॥ श्रीः ॥

पाणिनिमुनिप्रणीतः

अष्टाध्यायीसूत्रपाठः ।

काशीनाथ पाण्डुरङ्ग परब

इत्यनेन संस्कृतः ।

स च

मुम्बय्यां

निर्णयसागरयन्त्रालयाधिपतिना मुद्रितः ।

मूल्यं सपादो रूप्यकचतुष्पादः ।

SGDF
Sri Gurjeshwar Digital Foundation

491.250 8PAR

SGDF
Sri Gurgeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

अष्टाध्यायीसूत्रपाठः ।

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥

अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् ॥ इति प्रत्याहारसूत्राणि ॥

प्रथमोऽध्यायः ।

प्रथमः पादः ।

वृद्धिरादैच् । अदेङ्गुणः । इको गुणवृद्धी । न धातुलोप आर्धधातुके । क्ङिति च । दीधीवेवीटाम् । हलोऽनन्तराः संयोगः । मुखनासिकावचनोऽनुनासिकः । तुल्यास्यप्रयत्नं सवर्णम् । नाज्झलौ । ईदूदेद्विवचनं प्रगृह्यम् । अदसो मात् । शे । निपात एकाजनाङ् । ओत् । संबुद्धौ शाकल्यस्येतावनार्षे । उञः । ऊँ । ईदूतौ च सप्तम्यर्थे । दाधा घ्वदाप् ॥ १ ॥ आद्यन्तवदेकस्मिन् । तरप्तमपौ घः । बहुगणवतुडति संख्या । ष्णान्ता षट् । डति च । क्तक्तवतू निष्ठा । सर्वादीनि सर्वनामानि । विभाषा दिक्समासे बहुव्रीहौ । न बहुव्रीहौ । तृतीयासमासे । द्वन्द्वे च । विभाषा जसि । प्रथमचरमतयाल्पार्धकतिपयनेमाश्च । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । स्वरादिनि-

SGDF
Sri Gurgamani Digital Foundation

पातमव्ययम् । तद्धितश्चासर्वविभक्तिः । कृन्मेजन्तः । क्त्वातोसुन्कसुनः ॥ २ ॥ अव्ययीभावश्च । शि सर्वनामस्थानम् । सुडनपुंसकस्य । न वेति विभाषा । इग्यणः संप्रसारणम् । आद्यन्तौ टकितौ । मिदचोऽन्त्यात्परः । एच इग्घ्रस्वादेशे । षष्ठी स्थानेयोगा । स्थानेऽन्तरतमः । उरण्रपरः । अलोऽन्त्यस्य । ङिच्च । आदेः परस्य । अनेकाल्शित्सर्वस्य । स्थानिवदादेशोऽनल्विधौ । अचः परस्मिन्पूर्वविधौ । न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु । द्विर्वचनेऽचि । अदर्शनं लोपः ॥ ३ ॥ प्रत्ययस्य लुक्श्लुलुपः । प्रत्ययलोपे प्रत्ययलक्षणम् । न लुमताङ्गस्य । अचोऽन्त्यादि टि । अलोऽन्त्यात्पूर्व उपधा । तस्मिन्निति निर्दिष्टे पूर्वस्य । तस्मादित्युत्तरस्य । स्वं रूपं शब्दस्याशब्दसंज्ञा । अणुदित्सवर्णस्य चाप्रत्ययः । तपरस्तत्कालस्य । आदिरन्त्येन सहेता । येन विधिस्तदन्तस्य । वृद्धिर्यस्याचामादिस्तद्वृद्धम् । त्यदादीनि च । एङ् प्राचां देशे ॥ वृद्धिराद्यन्तवदव्ययीभावः प्रत्ययस्य लुक्पञ्चदश ॥

द्वितीयः पादः ।

गाङ्कुटादिभ्योऽञ्णिन्ङित् । विज इट् । विभाषोर्णोः । सार्वधातुकमपित् । असंयोगाल्लिट्कित् । इन्धिभवतिभ्यां च । मृडमृदगुधकुषक्लिशवदवसः क्त्वा । रुदविदमुषग्रहिस्वपिप्रच्छः संश्च । इको झल् । हलन्ताच्च । लिङ्सिचावात्मनेपदेषु । उश्च । वा गमः । हनः सिच् । यमो गन्धने । विभाषोपयमने । स्थाघ्वोरिच्च । न क्त्वा सेट् । निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः । मृषस्तितिक्षायाम् ॥ १ ॥ उदुपधाद्भावादिकर्मणोरन्यतरस्याम् । पूङः क्त्वा च । नोपधात्थफान्ताद्वा । वञ्चिलुञ्च्यृतश्च । तृषिमृषिकृशेः काश्यपस्य । रलो व्युपधाद्धलादेः संश्च । ऊकालोऽज्झ्रस्वदीर्घप्लुतः । अचश्च । उच्चैरुदात्तः । नीचैरनुदात्तः । समाहारः स्वरितः । तस्यादित उदात्तमर्धह्रस्वम् । एकश्रुति दूरात्संबुद्धौ । यज्ञकर्मण्यजपन्यूङ्खसामसु । उच्चैस्तरां वा वषट्कारः । विभाषा छन्दसि । न सुब्रह्मण्यायां स्वरितस्य तूदात्तः । देवब्रह्मणोरनुदात्तः । स्वरितात्संहितायामनुदात्तानाम् । उदात्तस्वरितपरस्य सन्नतरः ॥

२ ॥ अष्टक्त एकालप्रत्ययः । तत्पुरुषः समानाधिकरणः कर्मधारयः ।
प्रथमानिर्दिष्टं समास उपसर्जनम् । एकविभक्ति चापूर्वनिपाते । अ-
र्थवदधातुरप्रत्ययः प्रातिपदिकम् । कृत्तद्धितसमासाश्च । ह्रस्वो नपुंस-
के प्रातिपदिकस्य । गोस्त्रियोरुपसर्जनस्य । लुक्तद्धितलुकि । इद्गो-
ण्याः । लुपि युक्तवद्व्यक्तिवचने । विशेषणानां चाजातेः । तदशिष्यं
संज्ञाप्रमाणत्वात् । लुब्योगाप्रख्यानात् । योगप्रमाणे च तदभावेऽद-
र्शनं स्यात् । प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् । कालोप-
सर्जने च तुल्यम् । जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् । अ-
स्मदो द्वयोश्च । फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ ३ ॥ छन्दसि पु-
नर्वस्वोरेकवचनम् । विशाखयोश्च । तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवच-
नस्य द्विवचनं नित्यम् । सरूपाणामेकशेष एकविभक्तौ । वृद्धो यूना
तल्लक्षणश्चेदेव विशेषः । स्त्री पुंवच्च । पुमान्स्त्रिया । भ्रातृपुत्रौ स्वसृ-
दुहितृभ्याम् । नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् । पिता मा-
त्रा । श्वशुरः श्वश्र्वा । त्यदादीनि सर्वैर्नित्यम् । ग्राम्यपशुसंघेष्वत-
रुणेषु स्त्री ॥ गाङ्कुटाद्युदुपधादष्टक्तश्छन्दसि पुनर्वस्वोस्त्रयोदश ॥

तृतीयः पादः ।

भूवादयो धातवः । उपदेशेऽजनुनासिक इत् । हलन्त्यम् । न वि-
भक्तौ तुस्माः । आदिर्ञिटुडवः । षः प्रत्ययस्य । चुटू । लशक्वतद्धि-
ते । तस्य लोपः । यथासंख्यमनुदेशः समानाम् । स्वरितेनाधिकारः ।
अनुदात्तङित आत्मनेपदम् । भावकर्मणोः । कर्तरि कर्मव्यतिहारे । न
गतिहिंसार्थेभ्यः । इतरेतरान्योन्योपपदाच्च । नेर्विशः । परिव्यवेभ्यः
क्रियः । विपराभ्यां जेः । आङो दोऽनास्यविहरणे ॥ १ ॥ क्रीडो-
ऽनुसंपरिभ्यश्च । समवप्रविभ्यः स्थः । प्रकाशनस्थेयाख्ययोश्च । उदो-
ऽनूर्ध्वकर्मणि । उपान्मन्त्रकरणे । अकर्मकाच्च । उद्विभ्यां तपः ।
आङो यमहनः । समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः । निस-
मुपविभ्यो ह्वः । स्पर्धायामाङः । गन्धनावक्षेपणसेवनसाहसिक्यप्रतिय-
त्नप्रकथनोपयोगेषु कृञः । अधेः प्रसहने । वेः शब्दकर्मणः । अ-
कर्मकाच्च । संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ।
कर्तृस्थे चाशरीरे कर्मणि । वृत्तिसर्गतायनेषु क्रमः । उपपराभ्याम् ।

SGDF Sri Gargeshwari Digital Foundation

आङ उद्गमने ॥२॥ वेः पादविहरणे । प्रोपाभ्यां समर्थाभ्याम् । अनुपसर्गाद्वा । अपह्नवे ज्ञः । अकर्मकाच्च । संप्रतिभ्यामनाध्याने । भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः । व्यक्तवाचां समुच्चारणे । अनोरकर्मकात् । विभाषा विप्रलापे । अवाद्ग्रः । समः प्रतिज्ञाने । उदश्चरः सकर्मकात् । समस्तृतीयायुक्तात् । दाणश्च सा चेच्चतुर्थ्यर्थे । उपाद्यमः स्वकरणे । ज्ञाश्रुस्मृदृशां सनः । नानोर्ज्ञः । प्रत्याङ्भ्यां श्रुवः । शदेः शितः ॥ ३ ॥ म्रियतेर्लुङ्लिङोश्च । पूर्ववत्सनः । आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य । प्रोपाभ्यां युजेरयज्ञपात्रेषु । समः क्ष्णुवः । भुजोऽनवने । णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने । भीस्म्योर्हेतुभये । गृधिवञ्च्योः प्रलम्भने । लियः संमाननशालीनीकरणयोश्च । मिथ्योपपदात्कृञोऽभ्यासे । स्वरितञितः कर्त्रभिप्राये क्रियाफले । अपाद्वदः । णिचश्च । समुदाङ्भ्यो यमोऽग्रन्थे । अनुपसर्गाज्ज्ञः । विभाषोपपदेन प्रतीयमाने । शेषात्कर्तरि परस्मैपदम् । अनुपराभ्यां कृञः । अभिप्रत्यतिभ्यः क्षिपः ॥ ४ ॥ प्राद्वहः । परेर्मृषः । व्याङ्परिभ्यो रमः । उपाच्च । विभाषाकर्मकात् । बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः । निगरणचलनार्थेभ्यश्च । अणावकर्मकाच्चित्तवत्कर्तृकात् । न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः । वा क्यषः । द्युद्भ्यो लुङि । वृद्भ्यः स्यसनोः । लुटि च क्लृपः ॥ भूवादयः क्रीडोऽनु वेः पादम्रियतेः प्राद्वहस्त्रयोदश ॥

चतुर्थः पादः ।

आ कडारादेका संज्ञा । विप्रतिषेधे परं कार्यम् । यू स्त्र्याख्यौ नदी । नेयङुवङ्स्थानावस्त्री । वामि । ङिति ह्रस्वश्च । शेषो घ्यसखि । पतिः समास एव । षष्ठीयुक्तश्छन्दसि वा । ह्रस्वं लघु । संयोगे गुरु । दीर्घं च । यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् । सुप्तिङन्तं पदम् । नः क्ये । सिति च । स्वादिष्वसर्वनामस्थाने । यचि भम् । तसौ मत्वर्थे । अयस्मयादीनि छन्दसि ॥ १ ॥ बहुषु बहुवचनम् । द्व्येकयोर्द्विवचनैकवचने । कारके । ध्रुवमपायेऽपादानम् । भीत्रा-

र्थानां भयहेतुः। पराजेरसोढः। वारणार्थानामीप्सितः। अन्तर्धौ येनादर्शनमिच्छति। आख्यातोपयोगे। जनिकर्तुः प्रकृतिः। भुवः प्रभवः। कर्मणा यमभिप्रैति स संप्रदानम्। रुच्यर्थानां प्रीयमाणः। श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः। धारेरुत्तमर्णः। स्पृहेरीप्सितः। क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। क्रुधद्रुहोरुपसृष्टयोः कर्म। राधीक्ष्योर्यस्य विप्रश्नः। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ २ ॥ अनुप्रतिगृणश्च। साधकतमं करणम्। दिवः कर्म च। परिक्रयणे संप्रदानमन्यतरस्याम्। आधारोऽधिकरणम्। अधिशीङ्स्थासां कर्म। अभिनिविशश्च। उपान्वध्याङ्वसः। कर्तुरीप्सिततमं कर्म। तथायुक्तं चानीप्सितम्। अकथितं च। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ। हृक्रोरन्यतरस्याम्। स्वतन्त्रः कर्ता। तत्प्रयोजको हेतुश्च। प्राग्रीश्वरान्निपाताः। चादयोऽसत्त्वे। प्रादयः। उपसर्गाः क्रियायोगे। गतिश्च ॥ ३ ॥ ऊर्यादिच्विडाचश्च। अनुकरणं चानितिपरम्। आदरानादरयोः सदसती। भूषणेऽलम्। अन्तरपरिग्रहे। कणेमनसी श्रद्धाप्रतीघाते। पुरोऽव्ययम्। अस्तं च। अच्छ गत्यर्थवदेषु। अदोऽनुपदेशे। तिरोऽन्तर्धौ। विभाषा कृञि। उपाजेऽन्वाजे। साक्षात्प्रभृतीनि च। अनत्याधान उरसिमनसी। मध्ये पदे निवचने च। नित्यं हस्ते पाणावुपयमने। प्राध्वं बन्धने। जीविकोपनिषदावौपम्ये। ते प्राग्धातोः ॥ ४ ॥ छन्दसि परेऽपि। व्यवहिताश्च। कर्मप्रवचनीयाः। अनुर्लक्षणे। तृतीयार्थे। हीने। उपोऽधिके च। अपपरी वर्जने। आङ्मर्यादावचने। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः। अभिरभागे। प्रतिः प्रतिनिधिप्रतिदानयोः। अधिपरी अनर्थकौ। सुः पूजायाम्। अतिरतिक्रमणे च। अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु। अधिरीश्वरे। विभाषा कृञि। लः परस्मैपदम्। तङानावात्मनेपदम् ॥ ५ ॥ तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः। तान्येकवचनद्विवचनबहुवचनान्येकशः। सुपः। विभक्तिश्च। युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः। प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च। अस्मद्युत्तमः। शेषे प्रथमः।

SGDF

परः संनिकर्षः संहिता । विरामोऽवसानम् ॥ आ कडाराद्बहुष्वनुप्रति-गृण ऊर्यादिछन्दासि तिङो दश ॥

इति प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

प्रथमः पादः ।

समर्थः पदविधिः । सुबामन्त्रिते पराङ्गवत्स्वरे । प्राक्कडारात्समासः । सह सुपा । अव्ययीभावः । अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु । यथासादृश्ये । यावदवधारणे । सुप्प्रतिना मात्रार्थे । अक्षशलाकासंख्याः परिणा । विभाषा । अपपरिबहिरञ्चवः पञ्चम्या । आङ्मर्यादाभिविध्योः । लक्षणेनाभिप्रती आभिमुख्ये अनुर्यत्समया । यस्य चायामः । तिष्ठद्गुप्रभृतीनि च । पारे मध्ये षष्ठ्या वा । संख्या वंश्येन । नदीभिश्च ॥ १ ॥ अन्यपदार्थे च संज्ञायाम् । तत्पुरुषः । द्विगुश्च । द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । स्वयं क्तेन । खट्वा क्षेपे । सामि । कालाः । अत्यन्तसंयोगे च । तृतीया तत्कृतार्थेन गुणवचनेन । पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः । कर्तृकरणे कृता बहुलम् । कृत्यैरधिकार्थवचने । अन्नेन व्यञ्जनम् । भक्ष्येण मिश्रीकरणम् । चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः । पञ्चमी भयेन । अपेतापोढमुक्तपतितापत्रस्तैरल्पशः । स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन । सप्तमी शौण्डैः ॥ २ ॥ सिद्धशुष्कपक्वबन्धैश्च । ध्वाङ्क्षेण क्षेपे । कृत्यैर्ऋणे । संज्ञायाम् । क्तेनाहोरात्रावयवाः । तत्र । क्षेपे । पात्रेसमितादयश्च । पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन । दिक्संख्ये संज्ञायाम् । तद्धितार्थोत्तरपदसमाहारे च । संख्यापूर्वो द्विगुः । कुत्सितानि कुत्सनैः । पापाणके कुत्सितैः । उपमानानि सामान्यवचनैः । उपमितं व्याघ्रादिभिः सामान्याप्रयोगे । विशेषणं विशेष्येण बहुलम् । पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च । श्रेण्यादयः कृतादिभिः । क्तेन नञ्विशि-

SGDF Sri Gargeshwari Digital Foundation

ष्टेनानञ् ॥ ३ ॥ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः । वृन्दारकनागकुञ्जरैः पूज्यमानम् । कतरकतमौ जातिपरिप्रश्ने । किं क्षेपे । पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः । प्रशंसावचनैश्च । युवा खलतिपलितवलिनजरतीभिः । कृत्यतुल्याख्या अजात्या । वर्णो वर्णेन । कुमारः श्रमणादिभिः । चतुष्पादो गर्भिण्या । मयूरव्यंसकादयश्च ॥ समर्थोऽन्यपदार्थे च सिद्धशुष्कसन्महद्द्वादश ॥

द्वितीयः पादः ।

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे । अर्धं नपुंसकम् । द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । प्राप्तापन्ने च द्वितीयया । कालाः परिमाणिना । नञ् । ईषदकृता । षष्ठी । याजकादिभिश्च । न निर्धारणे । पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन । क्तेन च पूजायाम् । अधिकरणवाचिना च । कर्मणि च । तृजकाभ्यां कर्तरि । कर्तरि च । नित्यं क्रीडाजीविकयोः । कुगतिप्रादयः । उपपदमतिङ् । अमैवाव्ययेन ॥ १ ॥ तृतीयाप्रभृतीन्यन्यतरस्याम् । क्त्वा च । शेषो बहुव्रीहिः । अनेकमन्यपदार्थे । संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये । दिङ्नामान्यन्तराले । तत्र तेनेदमिति सरूपे । तेन सहेति तुल्ययोगे । चार्थे द्वन्द्वः । उपसर्जनं पूर्वम् । राजदन्तादिषु परम् । द्वन्द्वे घि । अजाद्यदन्तम् । अल्पाच्तरम् ॥ सप्तमीविशेषणे बहुव्रीहौ । निष्ठा । वाहिताग्न्यादिषु । कडाराः कर्मधारये ॥ पूर्वापराधरोत्तरं तृतीयाप्रभृतीन्यष्टादश ॥

तृतीयः पादः ।

अनभिहिते । कर्मणि द्वितीया । तृतीया च होश्छन्दसि । अन्तरान्तरेणयुक्ते । कालाध्वनोरत्यन्तसंयोगे । अपवर्गे तृतीया । सप्तमीपञ्चम्यौ कारकमध्ये । कर्मप्रवचनीययुक्ते द्वितीया । यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी । पञ्चम्यपाङ्परिभिः । प्रतिनिधिप्रतिदाने च यस्मात् । गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि । चतुर्थी संप्रदाने । क्रियार्थोपपदस्य च कर्मणि स्थानिनः । तुमर्थाच्च भाववचनात् । नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च । मन्यकर्मण्यना-

SGDF Sri Gurudev Digital Foundation

दरे विभाषाप्राणिषु । कर्तृकरणयोस्तृतीया । सहयुक्तेऽप्रधाने । येनाङ्गविकारः ॥ १ ॥ इत्थंभूतलक्षणे । संज्ञोऽन्यतरस्यां कर्मणि । हेतौ । अकर्तर्यृणे पञ्चमी । विभाषा गुणेऽस्त्रियाम् । षष्ठी हेतुप्रयोगे । सर्वनाम्नस्तृतीया च । अपादाने पञ्चमी । अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते । षष्ठ्यतसर्थप्रत्ययेन । एनपा द्वितीया । पृथग्विनानानाभिस्तृतीयान्यतरस्याम् । करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य । दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् । दूरान्तिकार्थेभ्यो द्वितीया च । सप्तम्यधिकरणे च । यस्य च भावेन भावलक्षणम् । षष्ठी चानादरे । स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च । आयुक्तकुशलाभ्यां चासेवायाम् ॥ २ ॥ यतश्च निर्धारणम् । पञ्चमी विभक्ते । साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः । प्रसितोत्सुकाभ्यां तृतीया च । नक्षत्रे च लुपि । प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । संबोधने च । सामन्त्रितम् । एकवचनं संबुद्धिः । षष्ठी शेषे । ज्ञोऽविदर्थस्य करणे । अधीगर्थदयेशां कर्मणि । कृञः प्रतियत्ने । रुजार्थानां भाववचनानामज्वरेः । आशिषि नाथः । जासिनिप्रहणनाटक्राथपिषां हिंसायाम् । व्यवहृपणोः समर्थयोः । दिवस्तदर्थस्य । विभाषोपसर्गे । द्वितीया ब्राह्मणे ॥ ३ ॥ प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने । चतुर्थ्यर्थे बहुलं छन्दसि । यजेश्च करणे । कृत्वोर्थप्रयोगे कालेऽधिकरणे । कर्तृकर्मणोः कृति । उभयप्राप्तौ कर्मणि । क्तस्य च वर्तमाने । अधिकरणवाचिनश्च । न लोकाव्ययनिष्ठाखलर्थतृनाम् । अकेनोर्भविष्यदाधमर्ण्ययोः । कृत्यानां कर्तरि वा । तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् । चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥ अनभिहित इत्थंभूतयतश्च प्रेष्यब्रुवोस्त्रयोदश ॥

चतुर्थः पादः ।

द्विगुरेकवचनम् । द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । अनुवादे चरणानाम् । अध्वर्युक्रतुरनपुंसकम् । अध्ययनतोऽविप्रकृष्टाख्यानाम् । जातिरप्राणिनाम् । विशिष्टलिङ्गो नदीदेशोऽग्रामाः । क्षुद्रजन्तवः । येषां च विरोधः शाश्वतिकः । शूद्राणामनिरवसितानाम् । गवाश्वप्रभृतीनि च । विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्त-

SGDF

राणाम् । विप्रतिषिद्धं चानधिकरणवाचि । न दधिपयआदीनि । अधिकरणैतावत्त्वे च । विभाषा समीपे । स नपुंसकम् । अव्ययीभावश्च । तत्पुरुषोऽनञ्कर्मधारयः । संज्ञायां कन्थोशीनरेषु ॥ १ ॥ उपज्ञोपक्रमं तदाद्याचिख्यासायाम् । छाया बाहुल्ये । सभा राजामनुष्यपूर्वा । अशाला च । विभाषा सेनासुराछायाशालानिशानाम् । परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः । पूर्ववदश्ववडवौ । हेमन्तशिशिरावहोरात्रे च छन्दसि । रात्राह्नाहाः पुंसि । अपथं नपुंसकम् । अर्धर्चाः पुंसि च । इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ । एतदस्त्रतसोस्त्रतसौ चानुदात्तौ । द्वितीयाटौःस्वेनः । आर्धधातुके । अदो जग्धिर्ल्यप्ति किति । लुङ्सनोर्घस्लृ । घञपोश्च । बहुलं छन्दसि । लिट्यन्यतरस्याम् ॥ २ ॥ वेञो वयिः । हनो वध लिङि । लुङि च । आत्मनेपदेष्वन्यतरस्याम् । इणो गा लुङि । णौ गमिरबोधने । सनि च । इङश्च । गाङ्लिटि । विभाषा लुङ्लृङोः । णौ च संश्चङोः । अस्तेर्भूः । ब्रुवो वचिः । चक्षिङः ख्याञ् । वा लिटि । अजेर्व्यघञपोः । वा यौ । ण्यक्षत्रियार्षञितो यूनि लुगणिञोः । पैलादिभ्यश्च । इञः प्राचाम् ॥ ३ ॥ न तौल्वलिभ्यः । तद्राजस्य बहुषु तेनैवास्त्रियाम् । यस्कादिभ्यो गोत्रे । यञञोश्च । अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च । बह्वच इञः प्राच्यभरतेषु । न गोपवनादिभ्यः । तिककितवादिभ्यो द्वन्द्वे । उपकादिभ्योऽन्यतरस्यामद्वन्द्वे । आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् । सुपो धातुप्रातिपदिकयोः । अदिप्रभृतिभ्यः शपः । बहुलं छन्दसि । यङोऽचि च । जुहोत्यादिभ्यः श्लुः । बहुलं छन्दसि । गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु । विभाषा घ्राधेट्शाच्छासः । तनादिभ्यस्तथासोः । मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः ॥ ४ ॥ आमः । अव्ययादाप्सुपः । नाव्ययीभावादतोऽम्त्वपञ्चम्याः । तृतीयासप्तम्योर्बहुलम् । लुटः प्रथमस्य डारौरसः ॥ द्विगुरुपज्ञोपक्रमं वेञो वयिर्न तौल्वलिभ्य आमः पञ्च ॥

इति द्वितीयोऽध्यायः ।

SGDF
Sri Gargeshwari Digital Foundation

तृतीयोऽध्यायः ।

प्रथमः पादः ।

प्रत्ययः । परश्च । आद्युदात्तश्च । अनुदात्तौ सुप्पितौ । गुप्तिज्किद्भ्यः सन् । मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य । धातोः कर्मणः समानकर्तृकादिच्छायां वा । सुप आत्मनः क्यच् । काम्यच्च । उपमानादाचारे । कर्तुः क्यङ् सलोपश्च । भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः । लोहितादिडाज्भ्यः क्यष् । कष्टाय क्रमणे । कर्मणो रोमन्थतपोभ्यां वर्तिचरोः । बाष्पोष्मभ्यामुद्वमने । शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे । सुखादिभ्यः कर्तृवेदनायाम् । नमोवरिवश्चित्रङः क्यच् । पुच्छभाण्डचीवराण्णिङ् ॥ १ ॥ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् । धातोरेकाचो हलादेः क्रियासमभिहारे यङ् । नित्यं कौटिल्ये गतौ । लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम् । सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् । हेतुमति च । कण्ड्वादिभ्यो यक् । गुपूधूपविच्छिपणिपनिभ्य आयः । ऋतेरीयङ् । कमेर्णिङ् । आयादय आर्धधातुके वा । सनाद्यन्ता धातवः । स्यतासी लृलुटोः । सिब्बहुलं लेटि । कास्प्रत्ययादाममन्त्रे लिटि । इजादेश्च गुरुमतोऽनृच्छः । दयायासश्च । उषविदजागृभ्योऽन्यतरस्याम् । भीह्रीभृहुवां श्लुवच्च । कृञ्चानुप्रयुज्यते लिटि ॥ २ ॥ विदांकुर्वन्त्वित्यन्यतरस्याम् । अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि । च्लि लुङि । च्लेः सिच् । शल इगुपधादनिटः क्सः । श्लिष आलिङ्गने । न दृशः । णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । विभाषा धेट्श्व्योः । गुपेश्छन्दसि । नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः । अस्यतिवक्तिख्यातिभ्योऽङ् । लिपिसिचिह्वश्च । आत्मनेपदेष्वन्यतरस्याम् । पुषादिद्युताद्यॢदितः परस्मैपदेषु । सर्तिशास्त्यर्तिभ्यश्च । इरितो वा । जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च । कृमृदृरुहिभ्यश्छन्दसि । चिण् ते पदः ॥ ३ ॥ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् । अचः कर्मकर्तरि । दुहश्च । न रुधः । तपोऽनुतापे च । चिण्भावकर्मणोः । सार्वधातुके

यक् । कर्तरि शप् । दिवादिभ्यः श्यन् । वा भ्राशभ्लाशभ्रमुक्रमुक्ल-
मुत्रासित्रुटिलषः । यसोऽनुपसर्गात् । संयसश्च । स्वादिभ्यः श्नुः ।
श्रुवः शृ च । अक्षोऽन्यतरस्याम् । तनूकरणे तक्षः । तुदादिभ्यः
शः । रुधादिभ्यः श्नम् । तनादिकृञ्भ्य उः । धिन्विकृण्व्योर च ॥
४ ॥ क्र्यादिभ्यः श्ना । स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च ।
हलः श्नः शानज्झौ । छन्दसि शायजपि । व्यत्ययो बहुलम् । लि-
ङ्याशिष्यङ् । कर्मवत्कर्मणा तुल्यक्रियः । तपस्तपःकर्मकस्यैव ।
न दुहस्नुनमां यक्चिणौ । कुषिरजोः प्राचां श्यन्परस्मैपदं च । धातोः ।
तत्रोपपदं सप्तमीस्थम् । कृदतिङ् । वासरूपोऽस्त्रियाम् । कृत्याः प्रा-
ङ्ण्वुलः । तव्यत्तव्यानीयरः । अचो यत् । पोरदुपधात् । शकिसहो-
श्च । गदमदचरयमश्चानुपसर्गे ॥ ५ ॥ अवद्यपण्यवर्या गर्ह्यपणितव्या-
निरोधेषु । वह्यं करणम् । अर्यः स्वामिवैश्ययोः । उपसर्या काल्या
प्रजने । अजर्यं संगतम् । वदः सुपि क्यप् च । भुवो भावे । हनस्त च ।
एतिस्तुशास्वृदृजुषः क्यप् । ऋदुपधाच्चाकॢपिचृतेः । ई च खनः ।
भृञोऽसंज्ञायाम् । मृजेर्विभाषा । राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टप-
च्याव्यथ्याः । भिद्योद्ध्यौ नदे । पुष्यसिध्यौ नक्षत्रे । विपूयविनीय-
जित्या मुञ्जकल्कहलिषु । प्रत्यपिभ्यां ग्रहेश्छन्दसि । पदास्वैरिबा-
ह्यापक्ष्येषु च । विभाषा कृवृषोः ॥ ६ ॥ युग्यं च पत्रे । अमावस्य-
दन्यतरस्याम् । छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्त-
र्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योप-
चाय्यपृडानि । ऋहलोर्ण्यत् । ओरावश्यके । आसुयुवपिरपिलपित्र-
पिचमश्च । आनाय्योऽनित्ये । प्रणाय्योऽसंमतौ । पाय्यसांनाय्यनिका-
य्यधाय्या मानहविर्निवाससामिधेनीषु । क्रतौ कुण्डपाय्यसंचाय्यौ ।
अग्नौ परिचाय्योपचाय्यसमूह्याः । चित्याग्निचित्ये च । ण्वुल्तृचौ ।
नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः । इगुपधज्ञाप्रीकिरः कः । आत-
श्चोपसर्गे । पाघ्राध्माधेट्दृशः शः । अनुपसर्गाल्लिम्पविन्दधारिपारिवे-
द्युदेजिचेतिसातिसाहिभ्यश्च । ददातिदधात्योर्विभाषा । ज्वलिति कस-
न्तेभ्यो णः ॥ ७ ॥ श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ।
दुन्योरनुपसर्गे । विभाषा ग्रहः । गेहे कः । शिल्पिनि ष्वुन् । गस्थ-

SGDF

कन् । ण्युट् च । हश्च व्रीहिकालयोः । प्रुसृल्वः समभिहारे वुन् । आशिषि च ॥ प्रत्ययो मुण्डविदांदीपजनक्र्यादिभ्योऽवद्ययुग्यं च श्याद्व्यधा दश ॥

द्वितीयः पादः ।

कर्मण्यण् । ह्वावामश्च । आतोऽनुपसर्गे कः । सुपि स्थः । तुन्दशोकयोः परिमृजापनुदोः । प्रे दाज्ञः । समि ख्यः । गापोष्टक् । हरतेरनुद्यमनेऽच् । वयसि च । आङि ताच्छील्ये । अर्हः । स्तम्बकर्णयो रमिजपोः । शमि धातोः संज्ञायाम् । अधिकरणे शेतेः । चरेष्टः । भिक्षासेनादायेषु च । पुरोग्रतोग्रेषु सर्तेः । पूर्वे कर्तरि । कृञो हेतुताच्छील्यानुलोम्येषु ॥ १ ॥ दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु । कर्मणि भृतौ । न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु । स्तम्बशकृतोरिन् । हरतेर्दृतिनाथयोः पशौ । फलेग्रहिरात्मंभरिश्च । छन्दसि वनसनरक्षिमथाम् । एजेः खश् । नासिकास्तनयोर्ध्माधेटोः । नाडीमुष्टयोश्च । उदि कूले रुजिवहोः । वहाभ्रे लिहः । परिमाणे पचः । मितनखे च । विध्वरुषोस्तुदः । असूर्यललाटयोर्दृशितपोः । उग्रंपश्येरंमदपाणिंधमाश्च । प्रियवशे वदः खच् । द्विषत्परयोस्तापेः । वाचि यमो व्रते ॥ २ ॥ पूःसर्वयोर्दारिसहोः । सर्वकूलाभ्रकरीषेषु कषः । मेघर्तिभयेषु कृञः । क्षेमप्रियमद्रेऽण्च । आशिते भुवः करणभावयोः । संज्ञायां भृतॄवृजिधारिसहितपिदमः । गमश्च । अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः । आशिषि हनः । अपे क्लेशतमसोः । कुमारशीर्षयोर्णिनिः । लक्षणे जायापत्योष्टक् । अमनुष्यकर्तृके च । शक्तौ हस्तिकपाटयोः । पाणिघताडघौ शिल्पिनि । आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् । कर्तरि भुवः खिष्णुच्खुकञौ । स्पृशोऽनुदके क्विन् । ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च । त्यदादिषु दृशोऽनालोचने कञ्च ॥ ३ ॥ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् । भजो ण्विः । छन्दसि सहः । वहश्च । कव्यपुरीषपुरीष्येषु ञ्युट् । हव्ये-

ऽनन्तःपादम् । जनसनखनक्रमगमो विट् । अदोऽनन्ने । क्रव्ये च । दुहः कब्घश्च । मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् । अवे यजः । विजुपे छन्दसि । आतो मनिन्क्वनिब्वनिपश्च । अन्येभ्योऽपि दृश्यन्ते । क्विप् च । स्थः क च । सुप्यजातौ णिनिस्ताच्छील्ये । कर्तर्युपमाने व्रते ॥ ४ ॥ बहुलमाभीक्ष्ण्ये । मनः । आत्ममाने खश्च । भूते । करणे यजः । कर्मणि हनः । ब्रह्मभ्रूणवृत्रेषु क्विप् । बहुलं छन्दसि । सुकर्मपापमन्त्रपुण्येषु कृञः । सोमे सुञः । अग्नौ चेः । कर्मण्यग्न्याख्यायाम् । कर्मणीनिर्विक्रियः । दृशेः क्वनिप् । राजनि युधिकृञः । सहे च । सप्तम्यां जनेर्डः । पञ्चम्यामजातौ । उपसर्गे च संज्ञायाम् । अनौ कर्मणि ॥ ५ ॥ अन्येष्वपि दृश्यते । निष्ठा । सुयजोर्ङ्वनिप् । जीर्यतेरतृन् । छन्दसि लिट् । लिटः कानज्वा । क्वसुश्च । भाषायां सदवसश्रुवः । उपेयिवाननाश्वाननूचानश्च । लुङ् । अनद्यतने लङ् । अभिज्ञावचने लृट् । न यदि । विभाषा साकाङ्क्षे । परोक्षे लिट् । हशश्वतोर्लङ् च । प्रश्ने चासन्नकाले । लट् स्मे । अपरोक्षे च । ननौ पृष्टप्रतिवचने ॥ ६ ॥ नन्वोर्विभाषा । पुरि लुङ् चास्मे । वर्तमाने लट् । लटः शतृशानचावप्रथमासमानाधिकरणे । संबोधने च । लक्षणहेत्वोः क्रियायाः । तौ सत् । पूङ्यजोः शानन् । ताच्छील्यवयोवचनशक्तिषु चानश् । इङ्धार्योः शत्रकृच्छ्रिणि । द्विषोऽमित्रे । सुञो यज्ञसंयोगे । अर्हः प्रशंसायाम् । आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु । तृन् । अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् । णेश्छन्दसि । भुवश्च । ग्लाजिस्थश्च ग्स्नुः । त्रसिगृधिधृषिक्षिपेः क्नुः ॥ ७ ॥ शमित्यष्टाभ्यो घिनुण् । संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च । वौ कषलसकत्थस्रम्भः । अपे च लषः । प्रे लपसृद्रुमथवदवसः । निन्दहिंसाक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् । देविक्रुशोश्चोपसर्गे । चलनशब्दार्थादकर्मकाद्युच् । अनुदात्तेतश्च हलादेः । जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः । क्रुधमण्डार्थेभ्यश्च । न यः । सूददीपदीक्षश्च । लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् । जल्प-

SGDF Sri Gurgadhavan Digital Foundation

भिक्षकुट्टलुण्टवृङः षाकन् । प्रजोरिनिः । जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् । दाधेट्सिशदसदो रुः । सृघस्यदः क्मरच् ॥ ८ ॥ भञ्जभासमिदो घुरच् । विदिभिदिच्छिदेः कुरच् । इण्नशजिसर्तिभ्यः क्वरप् । गत्वरश्च । जागरूकः । यजजपदशां यङः । नमिकम्पिस्म्यजसकमहिंसदीपो रः । सन्नाशंसभिक्ष उः । बिन्दुरिच्छुः । क्याच्छन्दसि । आदृगमहनजनः किकिनौ लिट्च । स्वपितृषोर्नजिङ् । शॄवन्द्योरारुः । भियः क्रुक्लुकनौ । स्थेशभासपिसकसो वरच् । यश्च यङः । भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् । अन्येभ्योऽपि दृश्यते । भुवः संज्ञान्तरयोः । विप्रसम्भ्यो ड्वसंज्ञायाम् ॥ ९ ॥ धः कर्मणि ष्ट्रन् । दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे । हलसूकरयोः पुवः । अर्तिलूधूसूखनसहचर इत्रः । पुवः संज्ञायाम् । कर्तरि चर्षिदेवतयोः । ञीतः क्तः । मतिबुद्धिपूजार्थेभ्यश्च ॥ कर्मणि दिवापूःसर्वसत्सूबहुलमन्येष्वपि नन्वोः शमिति भञ्जभासधः कर्मण्यष्टौ ॥

तृतीयः पादः ।

उणादयो बहुलम् । भूतेऽपि दृश्यन्ते । भविष्यति गम्यादयः । यावत्पुरानिपातयोर्लट् । विभाषा कदाकर्ह्योः । किंवृत्ते लिप्सायाम् । लिप्स्यमानसिद्धौ च । लोडर्थलक्षणे च । लिङ्चोर्ध्वमौहूर्तिके । तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् । भाववचनाश्च । अण्कर्मणि च । लृट्शेषे च । लृटः सद्वा । अनद्यतने लुट् । पदरुजविशस्पृशो घञ् । सृ स्थिरे । भावे । अकर्तरि च कारके संज्ञायाम् । परिमाणाख्यायां सर्वेभ्यः ॥ १ ॥ इङश्च । उपसर्गे रुवः । समि युद्रुदुवः । श्रिणीभुवोऽनुपसर्गे । वौ क्षुश्रुवः । अवोदोर्नियः । प्रे द्रुस्तुस्रुवः । निरभ्योः पूल्वोः । उन्योर्ग्रः । कॄ धान्ये । यज्ञे समि स्तुवः । प्रे स्त्रोऽयज्ञे । प्रथने वावशब्दे । छन्दोनाम्नि च । उदि ग्रहः । समि मुष्टौ । परिन्योर्नीणोर्द्यूताभ्रेषयोः । परावनुपात्यय इणः । व्युपयोः शेतेः पर्याये । हस्तादाने चेरस्तेये ॥ २ ॥ निवासचितिशरीरोपसमाधानेष्वादेश्च कः । संघे चानौत्तराधर्ये । कर्मव्यतिहारे णच्स्त्रियाम् । अभिविधौ

SGDF

भाव इनुण् । आक्रोशेऽवन्योर्ग्रहः । प्रे लिप्सायाम् । परौ यज्ञे । नौ वृ धान्ये । उदि श्रयतियौतिपूद्रुवः । विभाषाङि रुप्लुवोः । अवे ग्रहो वर्षप्रतिबन्धे । प्रे वणिजाम् । रश्मौ च । वृणोतेराच्छादने । परौ भुवोऽवज्ञाने । एरच् । ऋदोरप् । ग्रहवृदृनिश्चिगमश्च । उपसर्गेऽदः । नौ ण च ॥ ३ ॥ व्यधजपोरनुपसर्गे । स्वनहसोर्वा । यमः समुपनिविषु च । नौ गदनदपठस्वनः । क्वणो वीणायां च । नित्यं पणः परिमाणे । मदोऽनुपसर्गे । प्रमदसंमदौ हर्षे । समुदोरजः पशुषु । अक्षेषु ग्लहः । प्रजने सर्तेः । ह्वः संप्रसारणं च न्यभ्युपविषु । आङि युद्धे । निपानमाहावः । भावेऽनुपसर्गस्य । हनश्च वधः । मूर्तौ घनः । अन्तर्घनो देशे । अगारैकदेशे प्रघणः प्रघाणश्च । उद्घनोऽत्याधानम् ॥ ४ ॥ अपघनोऽङ्गम् । करणेऽयोविद्रुषु । स्तम्बे क च । परौ घः । उपघ्न आश्रये । संघोद्घौ गणप्रशंसयोः । निघो निमितम् । ड्वितः क्त्रिः । ट्वितोऽथुच् । यजयाचयतविच्छप्रच्छरक्षो नङ् । स्वपो नन् । उपसर्गे घोः किः । कर्मण्यधिकरणे च । स्त्रियां क्तिन् । स्थागापापचो भावे । मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः । ऊतियूतिजूतिसातिहेतिकीर्तयश्च । व्रजयजोर्भावे क्यप् । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः । कृञः श च ॥ ५ ॥ इच्छा । अ प्रत्ययात् । गुरोश्च हलः । षिद्भिदादिभ्योऽङ् । चिन्तिपूजिकथिकुम्बिचर्चश्च । आतश्चोपसर्गे । ण्यासश्रन्थो युच् । रोगाख्यायां ण्वुल्बहुलम् । संज्ञायाम् । विभाषाख्यानपरिप्रश्नयोरिञ्च । पर्यायार्हर्णोत्पत्तिषु ण्वुच् । आक्रोशे नञ्यनिः । कृत्यल्युटो बहुलम् । नपुंसके भावे क्तः । ल्युट् च । कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् । करणाधिकरणयोश्च । पुंसि संज्ञायां घः प्रायेण । गोचरसंचरवहव्रजव्यजापणनिगमाश्च । अवे तृस्त्रोर्घञ् ॥ ६ ॥ हलश्च । अध्यायन्यायोद्यावसंहाराधारावायाश्च । उदङ्कोऽनुदके । जालमानायः । खनो घ च । ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् । कर्तृकर्मणोश्च भूकृञोः । आतो युच् । छन्दसि गत्यर्थेभ्यः । अन्येभ्योऽपि दृश्यते । वर्तमानसामीप्ये वर्तमानवद्वा । आशंसायां भूतवच्च । क्षिप्रवचने ऌट् । आशंसावचने लिङ् । नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः । भविष्यति मर्यादावचनेऽवरस्मिन् ।

SGDF Sri Gurgeshwari Digital Foundation

कालविभागे चानहोरात्राणाम् । परस्मिन्विभाषा । लिङ्निमित्ते लृङ्क्रियातिपत्तौ । भूते च ॥ ७ ॥ वोताप्योः । गर्हायां लडपिजात्वोः । विभाषा कथमि लिङ्च । किंवृत्ते लिङ्लृटौ । अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि । किंकिलास्त्यर्थेषु लृट् । जातुयदोर्लिङ् । यच्चयत्रयोः । गर्हायां च । चित्रीकरणे च । शेषे लृडयदौ । उताप्योः समर्थयोर्लिङ् । कामप्रवेदनेऽकच्चिति । संभावनेऽलमिति चेत्सिद्धाप्रयोगे । विभाषा धातौ संभावनवचनेऽयदि । हेतुहेतुमतोर्लिङ् । इच्छार्थेषु लिङ्लोटौ । समानकर्तृकेषु तुमुन् । लिङ्च । इच्छार्थेभ्यो विभाषा वर्तमाने ॥ ८ ॥ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् । लोट्च । प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च । लिङ्चोर्ध्वमौहूर्तिके । स्मे लोट् । अधीष्टे च । कालसमयवेलासु तुमुन् । लिङ्यदि । अर्हे कृत्यतृचश्च । आवश्यकाधमर्ण्ययोर्णिनिः । कृत्याश्च । शकि लिङ्च । आशिषि लिङ्लोटौ । क्तिच्क्तौ च संज्ञायाम् । माङि लुङ् । स्मोत्तरे लङ्च ॥ उणादय इङो निवासव्यधजपोरपघन इच्छा हलश्च वोताप्योर्विधिषोडश ॥

चतुर्थः पादः ।

धातुसंबन्धे प्रत्ययाः । क्रियासमभिहारे लोट् । लोटो हिस्वौ वा च तध्वमोः । समुच्चयेऽन्यतरस्याम् । यथाविध्यनुप्रयोगः पूर्वस्मिन् । समुच्चये सामान्यवचनस्य । छन्दसि लुङ्लङ्लिटः । लिङर्थे लेट् । उपसंवादाशङ्कयोश्च । तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः । प्रयै रोहिष्यै अव्यथिष्यै । दृशे विख्ये च । शकि णमुल्कमुलौ । ईश्वरे तोसुन्कसुनौ । कृत्यार्थे तवैकेन्केन्यत्वनः । अवचक्षे च । भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् । सृपितृदोः कसुन् । अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा । उदीचां माङो व्यतीहारे । परावरयोगे च ॥ १ ॥ समानकर्तृकयोः पूर्वकाले । आभीक्ष्ण्ये णमुल्च । न यद्यनाकाङ्क्षे । विभाषाग्रेप्रथमपूर्वेषु । कर्मण्याक्रोशे कृञः खमुञ् । स्वादुमि णमुल् । अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् । यथातथयोरसूयाप्रतिवचने । कर्मणि दृशिविदोः साकल्ये । यावति विन्दजीवोः । चर्मोदरयोः पूरेः । वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् । चेले क्नोपेः । निमूलसमूलयोः कषः ।

शुष्कचूर्णरूक्षेषु पिषः । समूलाकृतजीवेषु हन्कृञ्ग्रहः । करणे हनः । स्नेहने पिषः । हस्ते वर्तिग्रहोः । स्वे पुषः ॥ २ ॥ अधिकरणे बन्धः । संज्ञायाम् । कर्त्रोर्जीवपुरुषयोर्नशिवहोः । ऊर्ध्वे शुषिपूरोः । उपमाने कर्मणि च । कषादिषु यथाविध्यनुप्रयोगः । उपदंशस्तृतीयायाम् । हिंसार्थानां च समानकर्मकाणाम् । सप्तम्यां चोपपीडरुधकर्षः । समासत्तौ । प्रमाणे च । अपादाने परीप्सायाम् । द्वितीयायां च । स्वाङ्गेऽध्रुवे । परिक्लिश्यमाने च । विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः । अस्यतितृषोः क्रियान्तरे कालेषु । नाम्न्यादिशिग्रहोः । अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ । तिर्यच्यपवर्गे ॥ ३ ॥ स्वाङ्गे तस्प्रत्यये कृभ्वोः । नाधार्थप्रत्यये च्व्यर्थे । तूष्णीमि भुवः । अन्वच्यानुलोम्ये । शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् । पर्याप्तिवचनेष्वलमर्थेषु । कर्तरि कृत् । भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा । लः कर्मणि च भावे चाकर्मकेभ्यः । तयोरेव कृत्यक्तखलर्थाः । आदिकर्मणि क्तः कर्तरि च । गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च । दाशगोघ्नौ संप्रदाने । भीमादयोऽपादाने । ताभ्यामन्यत्रोणादयः । क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः । लस्य । तिप्तस्झि सिप्थस्थ मिब्वस्मस्तातां झ थासाथां ध्वमिड्वहि महिङ् । टित आत्मनेपदानां टेरे । थासः से ॥ ४ ॥ लिटस्तझयोरेशिरेच् । परस्मैपदानां णलतुसुस्थलथुसणल्वमाः । विदो लटो वा । ब्रुवः पञ्चानामादित आहो ब्रुवः । लोटो लङ्वत् । एरुः । सेर्ह्यपिच्च । वा छन्दसि । मेर्निः । आमेतः । सवाभ्यां वामौ । आडुत्तमस्य पिच्च । एत ऐ । लेटोऽडाटौ । आत ऐ । वैतोऽन्यत्र । इतश्च लोपः परस्मैपदेषु । स उत्तमस्य । नित्यं ङितः । इतश्च ॥ ५ ॥ तस्थस्थमिपां ताम्तम्तामः । लिङः सीयुट् । यासुट्परस्मैपदेषूदात्तो ङिच्च । किदाशिषि । झस्य रन् । इटोऽत् । सुट्तिथोः । झेर्जुस् । सिजभ्यस्तविदिभ्यश्च । आतः । लङः शाकटायनस्यैव । द्विषश्च । तिङ्शित्सार्वधातुकम् । आर्धधातुकं

शेषः । लिट् च । लिङाशिषि । छन्दस्युभयथा ॥ धातुसंबन्धे समानाधिकरणे स्वाङ्गे लिटस्तस्थस्थामिपां सप्तदश ॥

इति तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

प्रथमः पादः ।

ङ्याप्प्रातिपदिकात् । स्वौ जसमौट्छष्टा भ्याम्भिस्ङे भ्याम्भ्यस्ङसि भ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् । स्त्रियाम् । अजाद्यतष्टाप् । ऋन्नेभ्यो ङीप् । उगितश्च । वनो र च । पादोऽन्यतरस्याम् । टाबृचि । न षट्स्वस्रादिभ्यः । मनः । अनो बहुव्रीहेः । डाबुभाभ्यामन्यतरस्याम् । अनुपसर्जनात् । टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः । यञश्च । प्राचां ष्फस्तद्धितः । सर्वत्र लोहितादिकतन्तेभ्यः । कौरव्यमाण्डूकाभ्यां च । वयसि प्रथमे ॥ १ ॥ द्विगोः । अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि । काण्डान्तात्क्षेत्रे । पुरुषात्प्रमाणेऽन्यतरस्याम् । बहुव्रीहेरूधसो ङीष् । संख्याव्ययादेर्ङीप् । दामहायनान्ताच्च । अन उपधालोपिनोऽन्यतरस्याम् । नित्यं संज्ञाछन्दसोः । केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च । रात्रेश्चाजसौ । अन्तर्वत्पतिवतोर्नुक् । पत्युर्नो यज्ञसंयोगे । विभाषा सपूर्वस्य । नित्यं सपत्न्यादिषु । पूतक्रतोरै च । वृषाकप्यग्निकुसितकुसिदानामुदात्तः । मनोरौ वा । वर्णादनुदात्तात्तोपधात्तो नः । अन्यतो ङीष् ॥ २ ॥ षिद्गौरादिभ्यश्च । जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु । शोणात्प्राचाम् । वोतो गुणवचनात् । बह्वादिभ्यश्च । नित्यं छन्दसि । भुवश्च । पुंयोगादाख्यायाम् । इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् । क्रीतात्करणपूर्वात् । क्तादल्पाख्यायाम् । बहुव्रीहेश्चान्तोदात्तात् । अस्वाङ्गपूर्वपदाद्वा । स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् । नासिकोदरोष्ठजङ्घादन्तक-

SGDF

र्णशृङ्गाच्च । न क्रोडादिबह्वचः । सहनञ्विद्यमानपूर्वाच्च । नखमुखा-
त्संज्ञायाम् । दीर्घजिह्वी च च्छन्दसि । दिक्पूर्वपदान्ङीप् ॥ ३ ॥
वाहः । सख्यशिश्वीति भाषायाम् । जातेरस्त्रीविषयादयोपधात् । पाक-
कर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च । इतो मनुष्यजातेः । ऊङुतः ।
बाह्वन्तात्संज्ञायाम् । पङ्गोश्च । ऊरूत्तरपदादौपम्ये । संहितशफलक्ष-
णवामादेश्च । कद्रुकमण्डल्वोश्छन्दसि । संज्ञायाम् । शार्ङ्गरवाद्यञो
ङीन् । यङश्चाप् । आवट्याच्च । तद्धिताः । यूनस्तिः । अणिञोरना-
र्षयोर्गुरूपोत्तमयोः ष्यङ्गोत्रे । गोत्रावयवात् । क्रौड्यादिभ्यश्च ॥ ४ ॥
दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् । समर्थानां
प्रथमाद्वा । प्राग्दीव्यतोऽण् । अश्वपत्यादिभ्यश्च । दित्यदित्यादित्य-
पत्युत्तरपदाण्ण्यः । उत्सादिभ्योऽञ् । स्त्रीपुंसाभ्यां नञ्स्नञौ भव-
नात् । द्विगोर्लुगनपत्ये । गोत्रेऽलुगचि । यूनि लुक् । फक्फिञोरन्य-
तरस्याम् । तस्यापत्यम् । एको गोत्रे । गोत्राद्यून्यस्त्रियाम् । अत
इञ् । बाह्वादिभ्यश्च । सुधातुरकङ्च । गोत्रे कुञ्जादिभ्यश्च्फञ् ।
नडादिभ्यः फक् । हरितादिभ्योऽञः ॥ ५ ॥ यञिञोश्च । श-
रद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु । द्रोणपर्वतजीवन्तादन्यतरस्याम् ।
अनृष्यानन्तर्ये विदादिभ्योऽञ् । गर्गादिभ्यो यञ् । मधुबभ्रो-
र्ब्राह्मणकौशिकयोः । कपिबोधादाङ्गिरसे । वतण्डाच्च । लुक्स्त्रि-
याम् । अश्वादिभ्यः फञ् । भर्गात्त्रैगर्ते । शिवादिभ्योऽण् । अवृद्धा-
भ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः । ऋष्यन्धकवृष्णिकुरुभ्यश्च ।
मातुरुत्संख्यासंभद्रपूर्वायाः । कन्यायाः कनीन च । विकर्णशुङ्गच्छ-
गलाद्वत्सभरद्वाजात्रिषु । पीलाया वा । ढक्च मण्डूकात् । स्त्रीभ्यो
ढक् ॥ ६ ॥ द्व्यचः । इतश्चानिञः । शुभ्रादिभ्यश्च । विकर्णकुषी-
तकात्काश्यपे । भ्रुवो वुक्च । कल्याण्यादीनामिनङ् । कुलटाया वा ।
चटकाया ऐरक् । गोधाया ढ्रक् । आरगुदीचाम् । क्षुद्राभ्यो वा ।
पितृष्वसुश्छण् । ढकि लोपः । मातृष्वसुश्च । चतुष्पाद्भ्यो ढञ् । गृ-
ष्ट्यादिभ्यश्च । राजश्वशुराद्यत् । क्षत्राद्घः । कुलात्खः । अपूर्वपदा-
दन्यतरस्यां यड्ढकञौ ॥ ७ ॥ महाकुलादञ्खञौ । दुष्कुलाड्ढक् । स्व-
सुश्छः । भ्रातुर्व्यच्च । व्यन्तसपत्ने । रेवत्यादिभ्यष्ठक् । गोत्रस्त्रियाः
कुत्सने ण च । वृद्धाट्ठक्सौवीरेषु बहुलम् । फेश्छ च । फाण्टाहृति-

SGPF

मिमताभ्यां णफिञौ । कुर्वादिभ्यो ण्यः । सेनान्तलक्षणकारिभ्यश्च । उदीचामिञ् । तिकादिभ्यः फिञ् । कौसल्यकार्मार्याभ्यां च । अणो द्व्यचः । उदीचां वृद्धादगोत्रात् । वाकिनादीनां कुक्च । पुत्रान्तादन्यतरस्याम् । प्राचामवृद्धात्फिन्बहुलम् ॥ ८ ॥ मनोर्जातावञ्यतौ षुक्च । अपत्यं पौत्रप्रभृति गोत्रम् । जीवति तु वंश्ये युवा । भ्रातरि च ज्यायसि । वान्यस्मिन्सपिण्डे स्थविरतरे जीवति । वृद्धस्य च पूजायाम् । यूनश्च कुत्सायाम् । जनपदशब्दात्क्षत्रियादञ् । साल्वेयगान्धारिभ्यां च । द्व्यञ्मगधकलिङ्गसूरमसादण् । वृद्धेत्कोसलाजादाञ्ञ्यङ् । कुरुनादिभ्यो ण्यः । साल्वावयवप्रत्यग्रथकालकूटाश्मकादिञ् । ते तद्राजाः । कम्बोजाल्लुक् । स्त्रियामवन्तिकुन्तिकुरुभ्यश्च । अतश्च । न प्राच्यभर्गादियौधेयादिभ्यः ॥ ङ्याब्द्विगोः षिद्गौरादिर्वाहो दैवयज्ञियञ्रिबोद्ध्र्चचो महाकुलान्मनोर्जातावष्टादश ॥

द्वितीयः पादः ।

तेन रक्तं रागात् । लाक्षारोचनाशकलकर्दमाट्ठक् । नक्षत्रेण युक्तः कालः । लुबविशेषे । संज्ञायां श्रवणाश्वत्थाभ्याम् । द्वन्द्वाच्छः । दृष्टं साम । कलेर्ढक् । वामदेवाड्ड्यड्ड्यौ । परिवृतो रथः । पाण्डुकम्बलादिनिः । द्वैपवैयाघ्रादञ् । कौमारापूर्ववचने । तत्रोद्धृतममत्रेभ्यः । स्थण्डिलाच्छयितरि व्रते । संस्कृतं भक्षाः । शूलोखाद्यत् । दध्नष्ठक् । उदश्वितोऽन्यतरस्याम् । क्षीराड्ढञ् ॥ १ ॥ सास्मिन्पौर्णमासीति संज्ञायाम् । आग्रहायण्यश्वत्थाट्ठक् । विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः । सास्य देवता । कस्येत् । शुक्राद्घन् । अपोनप्त्रपांनप्तृभ्यां घः । छ च । महेन्द्राद्घाणौ च । सोमाट्ट्यण् । वाय्वृतुपित्रुषसो यत् । द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च । अग्नेर्ढक् । कालेभ्यो भववत् । महाराजप्रोष्ठपदाट्ठञ् । पितृव्यमातुलमातामहपितामहाः । तस्य समूहः । भिक्षादिभ्योऽण् । गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् । केदाराद्यञ्च ॥ २ ॥ ठञ्कवचिनश्च । ब्राह्मणमाणववाडवाद्यत् । ग्रामजनबन्धुसहायेभ्यस्तल् । अनुदात्तादेरञ् । खण्डिकादिभ्यश्च । चरणेभ्यो धर्मवत् । अचित्तहस्तिधेनोष्ठक् । केशाश्वाभ्यां यञ्छावन्यतरस्याम् । पाशादिभ्यो यः । खलगोरथात् ।

इनित्रकट्यचश्च । विषयो देशे । राजन्यादिभ्यो वुञ् । भौरिक्याद्यै-षुकार्यादिभ्यो विधल्भक्तलौ । सोऽस्यादिरिति च्छन्दसः प्रगाथेषु । संग्रामे प्रयोजनयोद्धृभ्यः । तदस्यां प्रहरणमिति क्रीडायां णः । घञः सास्यां क्रियेति ञः । तदधीते तद्वेद । क्रतूक्थादिसूत्रान्ताट्ठक् ॥३॥ क्रमादिभ्यो वुन् । अनुब्राह्मणादिनिः । वसन्तादिभ्यष्ठक् । प्रोक्ताल्लुक् । सूत्राच्च कोपधात् । छन्दोब्राह्मणानि च तद्विषयाणि । तदस्मिन्नस्तीति देशे तन्नाम्नि । तेन निर्वृत्तम् । तस्य निवासः । अदूरभवश्च । ओरञ् । मतोश्च बह्वजङ्गात् । बह्वचः कूपेषु । उदक्च विपाशः । संकलादिभ्यश्च । स्त्रीषु सौवीरसाल्वप्राक्षु । सुवास्त्वादिभ्योऽण् । रोणी । कोपधाच्च । वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ॥ ४ ॥ जनपदे लुप् । वरणादिभ्यश्च । शर्कराया वा । ठक्छौ च । नद्यां मतुप् । मध्वादिभ्यश्च । कुमुदनडवेतसेभ्यो ड्मतुप् । नडशादाड्ड्वलच् । शिखाया वलच् । उत्करादिभ्यश्छः । नडादीनां कुक्च । शेषे । राष्ट्रावारपाराद्घखौ । ग्रामाद्यखञौ । कत्र्यादिभ्यो ढकञ् । कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु । नद्यादिभ्यो ढक् । दक्षिणापश्चात्पुरसस्त्यक् । कापिश्याः ष्फक् । रङ्कोरमनुष्येऽण्च ॥५॥ द्युप्रागपागुदक्प्रतीचो यत् । कन्थायाष्ठक् । वर्णौ वुक् । अव्ययात्त्यप् । ऐषमोह्यःश्वसोऽन्यतरस्याम् । तीररूप्योत्तरपदादञ्ञौ । दिक्पूर्वपदादसंज्ञायां ञः । मद्रेभ्योऽञ् । उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् । प्रस्थोत्तरपदपलद्यादिकोपधादण् । कण्वादिभ्यो गोत्रे । इञश्च । न द्व्यचः प्राच्यभरतेषु । वृद्धाच्छः । भवतष्ठक्छसौ । काश्यादिभ्यष्ठञ्ञिठौ । वाहीकग्रामेभ्यश्च । विभाषोशीनरेषु । ओर्देशे ठञ् । वृद्धात्प्राचाम् ॥ ६ ॥ धन्वयोपधाद्वुञ् । प्रस्थपुरवहान्ताच्च । रोपधेतोः प्राचाम् । जनपदतदवध्योश्च । अवृद्धादपि बहुवचनविषयात् । कच्छाग्निवक्त्रवर्तोत्तरपदात् । धूमादिभ्यश्च । नगरात्कुत्सनप्रावीण्ययोः । अरण्यान्मनुष्ये । विभाषा कुरुयुगंधराभ्याम् । मद्रवृज्योः कन् । कोपधादण् । कच्छादिभ्यश्च । मनुष्यतत्स्थयोर्वुञ् । अपदातौ साल्वात् । गोयवाग्वोश्च । गर्तोत्तरपदाच्छः । गहादिभ्यश्च । प्राचां कटादेः । राज्ञः क च ॥ ७ ॥ वृद्धादकेकान्तखोपधात् । कन्थापलः

द्नगरग्रामह्रदोत्तरपदात् । पर्वताच्च । विभाषामनुष्ये । कृकणपर्णाद्भारद्वाजे ॥ तेन सारिमन्ठञ्क्रमादिभ्यो जनपदे द्युप्रागपाग्धन्वद्वद्वातपश्च ॥

तृतीयः पादः ।

युष्मदस्मदोरन्यतरस्यां खञ्च । तस्मिन्नणि च युष्माकास्माकौ । तवकममकावेकवचने । अर्धाद्यत् । परावराधमोत्तमपूर्वाच्च । दिक्पूर्वपदाट्ठञ्च । ग्रामजनपदैकदेशादञ्ठञौ । मध्यान्मः । अ सांप्रतिके । द्वीपादनुसमुद्रं यञ् । कालाट्ठञ् । श्राद्धे शरदः । विभाषा रोगातपयोः । निशाप्रदोषाभ्यां च । श्वसस्तुट् च । संधिवेलाद्यृतुनक्षत्रेभ्योऽण् । प्रावृष एण्यः । वर्षाभ्यष्ठक् । छन्दसि ठञ् । वसन्ताच्च ॥ १ ॥ हेमन्ताच्च । सर्वत्राण्च तलोपश्च । सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च । विभाषा पूर्वाह्णापराह्णाभ्याम् । तत्र जातः । प्रावृषष्ठप् । संज्ञायां शरदो वुञ् । पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् । पथः पन्थ च । अमावास्याया वा । अ च । सिन्ध्वपकराभ्यां कन् । अणञौ च । श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् । स्थानान्तगोशालखरशालाच्च । वत्सशालाभिजिदश्वयुक्शतभिषजो वा । नक्षत्रेभ्यो बहुलम् । कृतलब्धक्रीतकुशलाः । प्रायभवः । उपजानूपकर्णोपनीवेष्ठक् ॥ २ ॥ संभूते । कोशाड्ढञ् । कालात्साधुपुष्प्यत्पच्यमानेषु । उप्ते च । आश्वयुज्या वुञ् । ग्रीष्मवसन्तादन्यतरस्याम् । देयमृणे । कलाप्यश्वत्थयवबुसाद्वुन् । ग्रीष्मावरसमाद्वुञ् । संवत्सराग्रहायणीभ्यां ठञ्च । व्याहरति मृगः । तदस्य सोढम् । तत्र भवः । दिगादिभ्यो यत् । शरीरावयवाच्च । दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् । ग्रीवाभ्योऽण्च । गम्भीराञ्ञ्यः । अव्ययीभावाच्च । अन्तःपूर्वपदाट्ठञ् ॥ ३ ॥ ग्रामात्पर्यनुपूर्वात् । जिह्वामूलाङ्गुलेश्छः । वर्गान्ताच्च । अशब्दे यत्खावन्यतरस्याम् । कर्णललाटात्कनलंकारे । तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः । बह्वचोऽन्तोदात्ताट्ठञ् । क्रतुयज्ञेभ्यश्च । अध्यायेष्वेवर्षेः । पौरोडाशपुरोडाशात्ष्ठन् । छन्दसो यदणौ । द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् । अणृगयनादिभ्यः । तत आगतः । ठगायस्थानेभ्यः । शुण्डिकादिभ्योऽण् । विद्यायोनिसंबन्धेभ्यो

वुञ् । ऋतष्ठञ् । पितुर्यच्च । गोत्रादङ्कवत् ॥ ४ ॥ हेतुमनुष्येभ्यो-ऽन्यतरस्यां रूप्यः । मयट् च । प्रभवति । विदूराञ्ञ्यः । तद्गच्छति पथिदूतयोः । अभिनिष्क्रामति द्वारम् । अधिकृत्य कृते ग्रन्थे । शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः । सोऽस्य निवासः । अभिजनश्च । आयुधजीविभ्यश्छः पर्वते । शण्डिकादिभ्यो ञ्यः । सिन्धुतक्षशिलादिभ्योऽणञौ । तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः । भक्तिः । अचित्ताददेशकालाट्ठक् । महाराजाट्ठञ् । वासुदेवार्जुनाभ्यां वुन् । गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् । जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ॥ ५ ॥ तेन प्रोक्तम् । तित्तिरिवरतन्तुखण्डिकोखाच्छण् । काश्यपकौशिकाभ्यामृषिभ्यां णिनिः । कलापिवैशम्पायनान्तेवासिभ्यश्च । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । शौनकादिभ्यश्छन्दसि । कठचरकाल्लुक् । कलापिनोऽण् । छगलिनो ढिनुक् । पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः । कर्मन्दकृशाश्वादिनिः । तेनैकदिक् । तसिश्च । उरसो यच्च । उपज्ञाते । कृते ग्रन्थे । संज्ञायाम् । कुलालादिभ्यो वुञ् । क्षुद्राभ्रमरवटरपादपादञ् । तस्येदम् ॥ ६ ॥ रथाद्यत् । पत्रपूर्वादञ् । पत्राध्वर्युपरिषदश्च । हलसीराट्ठक् । द्वन्द्वाद्वुन्वैरमैथुनिकयोः । गोत्रचरणाद्वुञ् । संघाङ्कलक्षणेष्वञ्यञिञामण् । शाकलाद्वा । छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः । न दण्डमाणवान्तेवासिषु । रैवतिकादिभ्यश्छः । कौपिञ्जलहास्तिपदादण् । आथर्वणिकस्येकलोपश्च । तस्य विकारः । अवयवे च प्राण्योषधिवृक्षेभ्यः । बिल्वादिभ्योऽण् । कोपधाच्च । त्रपुजतुनोः षुक् । ओरञ् । अनुदात्तादेश्च ॥ ७ ॥ पलाशादिभ्यो वा । शम्याः ष्लञ् । मयड्वैतयोर्भाषायामभक्षाच्छादनयोः । नित्यं वृद्धशरादिभ्यः । गोश्च पुरीषे । पिष्टाच्च । संज्ञायां कन् । व्रीहेः पुरोडाशे । असंज्ञायां तिलयवाभ्याम् । द्व्यचश्छन्दसि । नोत्वद्वर्ध्रबिल्वात् । तालादिभ्योऽण् । जातरूपेभ्यः परिमाणे । प्राणिरजतादिभ्योऽञ् । ञितश्च तत्प्रत्ययात् । क्रीतवत्परिमाणात् । उष्ट्राद्वुञ् । उमोर्णयोर्वा । एण्या ढञ् । गोपयसोर्यत् ॥ ८ ॥ द्रोश्च । माने वयः । फले लुक् । प्लक्षादिभ्योऽण् । जम्ब्वा वा । लुप् च । हरीतक्यादिभ्यश्च । कंसीयपरशव्ययोर्यञञौ लु-

क्च ॥ युष्मद्भेमन्तात्संभूते ग्रामाद्धेतुतेन ग्थातपलाशादिभ्यो द्रोश्चाष्टौ॥

चतुर्थः पादः ।

प्राग्वहतेष्ठक् । तेन दीव्यति खनति जयति जितम् । संस्कृतम् । कुलत्थकोपधादण् । तरति । गोपुच्छाट्ठञ् । नौद्व्यचष्ठन् । चरति । आकर्षात्ष्ठल् । पर्पादिभ्यः ष्ठन् । श्वगणाट्ठश्च । वेतनादिभ्यो जीवति । वस्नक्रयविक्रयाट्ठन् । आयुधाच्छ च । हरत्युत्सङ्गादिभ्यः । भस्त्रादिभ्यः ष्ठन् । विभाषा विवधात् । अण्कुटिलिकायाः । निर्वृत्तेऽक्षद्यूतादिभ्यः । त्रेर्मम्नित्यम् ॥ १ ॥ अपमित्ययाचिताभ्यां कक्कनौ । संसृष्टे । चूर्णादिनिः । लवणाल्लुक् । मुद्गादण् । व्यञ्जनैरुपसिक्ते । ओजःसहोम्भसा वर्तते । तत्प्रत्यनुपूर्वमीपलोमकूलम् । परिमुखं च । प्रयच्छति गर्ह्यम् । कुसीददशैकादशात्ष्ठन्ष्ठचौ । उञ्छति । रक्षति । शब्ददर्दुरं करोति । पक्षिमत्स्यमृगान्हन्ति । परिपन्थं च तिष्ठति । माथोत्तरपदपदव्यनुपदं धावति । आक्रन्दाट्ठञ्च । पदोत्तरपदं गृह्णाति । प्रतिकण्ठार्थललामं च ॥ २ ॥ धर्मं चरति । प्रतिप्रथमेति ठंश्च । समवायान्समवैति । परिषदो ण्यः । सेनाया वा । संज्ञायां ललाटकुक्कुट्यौ पश्यति । तस्य धर्म्यम् । अण्महिष्यादिभ्यः । ऋतोऽञ् । अवक्रयः । तदस्य पण्यम् । लवणाट्ठञ् । किसरादिभ्यः ष्ठन् । शलालुनोऽन्यतरस्याम् । शिल्पम् । मड्डुकझर्झरादणन्यतरस्याम् । प्रहरणम् । परश्वधाट्ठञ्च । शक्तियष्ट्योरीकक् । अस्तिनास्तिदिष्टं मतिः ॥ ३ ॥ शीलम् । छत्रादिभ्यो णः । कर्माध्ययने वृत्तम् । बह्वच्पूर्वपदाट्ठच् । हितं भक्षाः । तदस्मै दीयते नियुक्तम् । श्राणामांसौदनाट्टिठन् । भक्तादणन्यतरस्याम् । तत्र नियुक्तः । अगारान्ताट्ठन् । अध्यायिन्यदेशकालात् । कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति । निकटे वसति । आवसथात्ष्ठल् । प्राग्घिताद्यत् । तद्वहति रथयुगप्रासङ्गम् । धुरो यड्ढकौ । खः सर्वधुरात् । एकधुराल्लुक्च । शकटादण् ॥ ४ ॥ हलसीराट्ठक् । संज्ञायां जन्या । विध्यत्यधनुषा । धनगणं लब्धा । अन्नाण्णः । वशं गतः । पदमस्मिन्दृश्यम् । मूलमस्याबर्हि । संज्ञायां धेनुष्या । गृहपतिना संयुक्ते ञ्यः । नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु । धर्मपथ्यर्थन्यायादन-

SGDF Sri Gangadhar Digital Foundation

पेते। छन्दसो निर्मिते। उरसोऽण्च। हृदयस्य प्रियः। बन्धने चर्षौ। मतजनहलात्करणजल्पकर्षेषु। तत्र साधुः। प्रतिजनादिभ्यः खञ्। भक्ताण्णः॥ ९॥ परिषदो ण्यः। कथादिभ्यष्ठक्। गुडादिभ्यष्ठञ्। पथ्यतिथिवसतिस्वपतेर्ढञ्। सभाया यः। ढश्छन्दसि। समानतीर्थे वासी। समानोदरे शयित ओ चोदात्तः। सोदराद्यः। भवे छन्दसि। पाथोनदीभ्यां ड्यण्। वेशन्तहिमवद्भ्यामण्। स्रोतसो विभाषा ड्यड्ड्यौ। सगर्भसयूथसनुताद्यत्। तुग्राद्घन्। अग्राद्यत्। घच्छौ च। समुद्राभ्राद्घः। बर्हिषि दत्तम्। दूतस्य भागकर्मणी॥ ६॥ रक्षोयातूनां हननी। रेवती जगतीहविष्याभ्यः प्रशस्ये। असुरस्य स्वम्। मायायामण्। तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः। अश्विमानण्। वयस्यासु मूर्ध्नो मतुप्। मत्वर्थे मासतन्वोः। मधोर्ञ च। ओजसोऽहनि यत्खौ। वेशोयशआदेर्भगाद्यल्। ख च। पूर्वैः कृतमिनियौ च। अद्भिः संस्कृतम्। सहस्रेण संमितौ घः। मतौ च। सोममर्हति यः। मये च। मधोः। वसोः समूहे च॥ ७॥ नक्षत्राद्घः। सर्वदेवात्तातिल्। शिवशमरिष्टस्य करे। भावे च॥ प्राग्वहतेरपमित्यधर्मं शीलं हलपरिषदो रक्षोनक्षत्राच्चत्वारि॥

इति चतुर्थोऽध्यायः।

पञ्चमोऽध्यायः।

प्रथमः पादः।

प्राक्क्रीताच्छः। उगवादिभ्यो यत्। कम्बलाच्च संज्ञायाम्। विभाषा हविरपूपादिभ्यः। तस्मै हितम्। शरीरावयवाद्यत्। खलयवमाषतिलवृषब्रह्मणश्च। अजाविभ्यां थ्यन्। आत्मन्विश्वजनभोगोत्तरपदात्खः। सर्वपुरुषाभ्यां णढञौ। माणवचरकाभ्यां खञ्। तदर्थं विकृतेः प्रकृतौ। छादिरुपधिबलेर्ढञ्। ऋषभोपानहोर्ञ्यः। चर्मणोऽञ्। तदस्य तदस्मिन्स्यादिति। परिखाया ढञ्। प्राग्वतेष्ठञ्। आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्। असमासे निष्कादिभ्यः॥ १॥ शताच्च ठन्यतावशते। संख्याया अतिशदन्तायाः कन्। वतोरिड्वा। विंशति-

त्रिंशद्भ्यां ड्वुनसंज्ञायाम् । कंसाट्टिठन् । शूर्पादञन्यतरस्याम् । शतमानविंशतिकसहस्रवसनादण् । अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् । विभाषा कार्षापणसहस्राभ्याम् । द्वित्रिपूर्वान्निष्कात् । विस्ताच्च । विंशतिकात्खः । खार्या ईकन् । पणपादमाषशताद्यत् । शाणाद्वा । द्वित्रिपूर्वादण्च । तेन क्रीतम् । तस्य निमित्तं संयोगोत्पातौ । गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् । पुत्राच्छ च ॥ २ ॥ सर्वभूमिपृथिवीभ्यामणञौ । तस्येश्वरः । तत्र विदित इति च । लोकसर्वलोकाट्ठञ् । तस्य वापः । पात्रात्ष्ठन् । तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते । पूरणार्धाट्ठन् । भागाद्यच्च । तद्धरति वहत्यावहति भाराद्वंशादिभ्यः । वस्नद्रव्याभ्यां ठन्कनौ । संभवत्यवहरति पचति । आढकाचितपात्रात्खोऽन्यतरस्याम् । द्विगोः ष्ठंश्च । कुलिजाल्लुक्खौ च । सोऽस्यांशवस्नभृतयः । तदस्य परिमाणम् । संख्यायाः संज्ञासंघसूत्राध्ययनेषु । पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् । पञ्चद्दशतौ वर्गे वा ॥ ३ ॥ सप्तनोऽञ्छन्दसि । त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् । तदर्हति । छेदादिभ्यो नित्यम् । शीर्षच्छेदाद्यच्च । दण्डादिभ्यो यः । छन्दसि च । पात्राद्घंश्च । कडंकरदक्षिणाच्छ च । स्थालीबिलात् । यज्ञर्त्विग्भ्यां घखञौ । पारायणतुरायणचान्द्रायणं वर्तयति । संशयमापन्नः । योजनं गच्छति । पथः ष्कन् । पथो ण नित्यम् । उत्तरपथेनाहृतं च । कालात् । तेन निर्वृत्तम् । तमधीष्टो भृतो भूतो भावी ॥ ४ ॥ मासाद्वयसि यत्खञौ । द्विगोर्यप् । षण्मासाण्ण्यच्च । अवयसि ठंश्च । समायाः खः । द्विगोर्वा । रात्र्यहःसंवत्सराच्च । वर्षाल्लुक्च । चित्तवति नित्यम् । षष्टिकाः षष्टिरात्रेण पच्यन्ते । वत्सरान्ताच्छश्छन्दसि । संपरिपूर्वात्ख च । तेन परिजय्यलभ्यकार्यसुकरम् । तदस्य ब्रह्मचर्यम् । तस्य दक्षिणा यज्ञाख्येभ्यः । तत्र च दीयते कार्यं भववत् । व्युष्टादिभ्योऽण् । तेन यथाकथाचहस्ताभ्यां णयतौ । संपादिनि । कर्मवेषाद्यत् ॥ ५ ॥ तस्मै प्रभवति संतापादिभ्यः । योगाद्यच्च । कर्मण उकञ् । समयस्तदस्य प्राप्तम् । ऋतोरण् । छन्दसि घस् । कालाद्यत् । प्रकृष्टे ठञ् । प्रयोजनम् । विशाखाषाढादण्मन्थदण्डयोः । अनुप्रवचनादिभ्यश्छः । समापनात्सपूर्वपदात् । ऐकागारिकट्चौरे । आकालिकडाद्यन्तवचने । तेन तुल्यं

SGDF
Sri Gangadharesvara Digital Foundation

क्रिया चेद्वतिः । तत्र तस्येव । तदर्हम् । उपसर्गाच्छन्दसि धात्वर्थे । तस्य भावस्त्वतलौ । आ च त्वात् ॥ ६ ॥ न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः । पृथ्वादिभ्य इमनिज्वा । वर्णदृढादिभ्यः ष्यञ्च । गुणवचनब्राह्मणादिभ्यः कर्मणि च । स्तेनाद्यन्नलोपश्च । सख्युर्यः । कपिज्ञात्योर्ढक् । पत्यन्तपुरोहितादिभ्यो यक् । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । हायनान्तयुवादिभ्योऽण् । इगन्ताच्च लघुपूर्वात् । योपधाद्गुरूपोत्तमाद्वुञ् । द्वन्द्वमनोज्ञादिभ्यश्च । गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु । होत्राभ्यश्छः । ब्रह्मणस्त्वः ॥ प्राक्क्रीताच्छताच्च सर्वभूमिसप्तनोऽञ्मासात्तस्मै प्रभवति न नञ्पूर्वात्षोडश॥

द्वितीयः पादः ।

धान्यानां भवने क्षेत्रे खञ् । व्रीहिशाल्योर्ढक् । यवयवकषष्टिकाद्यत् । विभाषा तिलमाषोमाभङ्गाणुभ्यः । सर्वचर्मणः कृतः खखञौ । यथामुखसंमुखस्य दर्शनः खः । तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति । आप्रपदं प्राप्नोति । अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु । परोवरपरंपरपुत्रपौत्रमनुभवति । अवारपारात्यन्तानुकामं गामी । समांसमां विजायते । अद्यश्वीनावष्टब्धे । आगवीनः । अनुग्वलंगामी । अध्वनो यत्खौ । अभ्यमित्राच्छ च । गोष्ठात्खञ्भूतपूर्वे । अश्वस्यैकाहगमः । शालीनकौपीने अधृष्टाकार्ययोः ॥ १ ॥ व्रातेन जीवति । साप्तपदीनं सख्यम् । हैयंगवीनं संज्ञायाम् । तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ । पक्षात्तिः । तेन वित्तश्चुञ्चुप्चणपौ । विनञ्भ्यां नानाञौ न सह । वेः शालच्छङ्कटचौ । संप्रोदश्च कटच् । अवात्कुटारच्च । नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः । नेर्बिडज्बिरीसचौ । इनच्पिटच्चिकचि च । उपाधिभ्यां त्यकन्नासन्नारूढयोः । कर्मणि घटोऽठच् । तदस्य संजातं तारकादिभ्य इतच् । प्रमाणे द्वयसज्दघ्नञ्मात्रचः । पुरुषहस्तिभ्यामण्च । यत्तदेतेभ्यः परिमाणे वतुप् । किमिदम्भ्यां वो घः ॥२॥ किमः संख्यापरिमाणे डति च । संख्याया अवयवे तयप् । द्वित्रिभ्यां तयस्यायज्वा । उभादुदात्तो नित्यम् । तदस्मिन्नधिकमिति दशान्ताड्डः । शदन्तविंशतेश्च । संख्याया गुणस्य निमाने मयट् । तस्य पूरणे डट् । नान्तादसंख्यादेर्मट् ।

SGPF

थट् च च्छन्दसि । षट्कतिकतिपयचतुरां थुक् । बहुपूगगणसंघस्य तिथुक् । वतोरिथुक् । द्वेस्तीयः । त्रेः संप्रसारणं च । विंशत्यादिभ्यस्तमडन्यतरस्याम् । नित्यं शतादिमासार्धमाससंवत्सराच्च । षष्ट्यादेश्चासंख्यादेः । मतौ छः सूक्तसाम्नोः । अध्यायानुवाकयोर्लुक् ॥ ३ ॥ विमुक्तादिभ्योऽण् । गोषदादिभ्यो वुन् । तत्र कुशलः पथः । आकर्षादिभ्यः कन् । धनहिरण्यात्कामे । स्वाङ्गेभ्यः प्रसिते । उदराट्ठगाद्यूने । सस्येन परिजातः । अंशं हारी । तन्त्रादचिरापहृते । ब्राह्मणकोष्णिके संज्ञायाम् । शीतोष्णाभ्यां कारिणि । अधिकम् । अनुकाभिकाभीकः कमिता । पार्श्वेनान्विच्छति । अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । तावतिथं ग्रहणमिति लुग्वा । स एषां ग्रामणीः । शृङ्खलमस्य बन्धनं करभे । उत्क उन्मनाः ॥ ४ ॥ कालप्रयोजनाद्रोगे । तदस्मिन्नन्नं प्रायेण संज्ञायाम् । कुल्माषादञ् । श्रोत्रियंश्छन्दोऽधीते । श्राद्धमनेन भुक्तमिनिठनौ । पूर्वादिनिः । सपूर्वाच्च । इष्टादिभ्यश्च । छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि । अनुपद्यन्वेष्टा । साक्षाद्द्रष्टरि संज्ञायाम् । क्षेत्रियच्परक्षेत्रे चिकित्स्यः । इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा । तदस्यास्त्यस्मिन्निति मतुप् । रसादिभ्यश्च । प्राणिस्थादातो लजन्यतरस्याम् । सिध्मादिभ्यश्च । वत्सांसाभ्यां कामबले । फेनादिलच्च ॥ लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥ ५ ॥ प्रज्ञाश्रद्धार्चाभ्यो णः । तपःसहस्राभ्यां विनीनी । अण्च । सिकताशर्कराभ्यां च । देशे लुबिलचौ च । दन्त उन्नत उरच् । ऊषशुषिमुष्कमधो रः । द्युद्रुभ्यां मः । केशाद्वोऽन्यतरस्याम् । गाण्डचजगात्संज्ञायाम् । काण्डाण्डादीरन्नीरचौ । रजःकृष्यासुतिपरिषदो वलच् । दन्तशिखात्संज्ञायाम् । ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः । अत इनिठनौ । व्रीह्यादिभ्यश्च । तुन्दादिभ्य इलच्च । एकगोपूर्वाट्ठञ्नित्यम् । शतसहस्रान्ताच्च निष्कात् । रूपादाहतप्रशंसयोर्यप् ॥ ६ ॥ अस्मायामेधास्रजो विनिः । बहुलं छन्दसि । ऊर्णाया युस् । वाचो ग्मिनिः । आलजाटचौ बहुभाषिणि । स्वादामिन्नैश्वर्ये । अर्शआदिभ्योऽच् । द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः । वातातीसाराभ्यां कुक्च । वयसि पूरणात् । सुखादिभ्यश्च । धर्मशीलवर्णान्ताच्च ।

हस्ताज्जातौ । वर्णाद्ब्रह्मचारिणि । पुष्करादिभ्यो देशे । बलादिभ्यो मतुबन्यतरस्याम् । संज्ञायां मन्माभ्याम् । कंशम्भ्यां बभयुस्तितुतयसः। तुन्दिबलिवटेर्भः । अहंशुभमोर्युस् ॥ ७ ॥ धान्यानां व्रातेन किमो वि- मुक्तादिभ्यो कालप्रयोजनात्प्रज्ञाश्रद्धास्मायामेधाविंशतिः ॥

तृतीयः पादः ।

प्राग्दिशो विभक्तिः । किंसर्वनामबहुभ्योऽद्व्यादिभ्यः । इदम इश् । एतेतौ रथोः । एतदोऽन् । सर्वस्य सोऽन्यतरस्यां दि । पञ्च- म्यास्तसिल् । तसेश्च । पर्यभिभ्यां च । सप्तम्यास्त्रल् । इदमो हः । किमोऽत् । वा ह चच्छन्दसि । इतराभ्योऽपि दृश्यन्ते । सर्वैकान्य- कियत्तदः काले दा । इदमो र्हिल् । अधुना । दानीं च । तदो दा च । तयोर्दार्हिलौ च च्छदसि ॥ १ ॥ अनद्यतने र्हिलन्यतरस्याम् । सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युर- धरेद्युरुभयेद्युरुत्तरेद्युः । प्रकारवचने थाल् । इदमस्थमुः । किमश्च । था हेतौ च च्छन्दसि । दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देश- कालेष्वस्तातिः । दक्षिणोत्तराभ्यामतसुच् । विभाषा परावराभ्याम् । अञ्चेर्लुक् । उपर्युपरिष्टात् । पश्चात् । पश्च पश्चा च च्छन्दसि । उत्त- राधरदक्षिणादातिः । एनबन्यतरस्यामदूरेऽपञ्चम्याः । दक्षिणादाच् । आहि च दूरे । उत्तराच्च । पूर्वाधरावराणामसि पुरधवश्चैषाम् । अ- स्ताति च ॥ २ ॥ विभाषावरस्य । संख्याया विधार्थे धा । अधिकर- णविचाले च । एकाद्धो ध्यमुञन्यतरस्याम् । द्वित्र्योश्च धमुञ् । ए- धाच्च । याप्ये पाशप् । पूरणाद्भागे तीयादन् । प्रागेकादशभ्योऽछ- न्दसि । षष्ठाष्टमाभ्यां ञ च । मानपश्वङ्गयोः कन्लुकौ च । एका- दाकिनिच्चासहाये । भूतपूर्वे चरट् । षष्ठ्या रूप्य च । अतिशायने तमबिष्ठनौ । तिङश्च । द्विवचनविभज्योपपदे तरबीयसुनौ । अजादी गुणवचनादेव । तुश्छन्दसि । प्रशस्यस्य श्रः ॥ ३ ॥ ज्य च । वृ- द्धस्य च । अन्तिकबाढयोर्नेदसाधौ । युवाल्पयोः कनन्यतरस्याम् । विन्मतोर्लुक् । प्रशंसायां रूपप् । ईषदसमाप्तौ कल्पब्देश्यदेशीयरः । विभाषा सुपो बहुच्पुरस्तात्तु । प्रकारवचने जातीयर् । प्रागिवात्कः । अव्ययसर्वनाम्नामकच्प्राक्टेः । कस्य च दः । अज्ञाते । कुत्सिते ।

संज्ञायां कन् । अनुकम्पायाम् । नीतौ च तद्युक्तात् । बह्वचो मनुष्य-नाम्नष्ठज्वा । घनिलचौ च । प्राचामुपादेरडज्वुचौ च ॥ ४ ॥ जाति-नाम्नः कन् । अजितान्तस्योत्तरपदलोपश्च । ठाजादावूर्ध्वं द्वितीया-दचः । शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् । अल्पे । ह्रस्वे । संज्ञायां कन् । कुटीशमीशुण्डाभ्यो रः । कुत्वा डुपच् । कासूगोणी-भ्यां ष्टरच् । वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे । किंयत्तदोर्निर्धारणे द्वयो-रेकस्य डतरच् । वा बहूनां जातिपरिप्रश्ने डतमच् । एकाच्च प्रा-चाम् । अवक्षेपणे कन् । इवे प्रतिकृतौ । संज्ञायां च । लुम्मनुष्ये । जीविकार्थे चापण्ये । देवपथादिभ्यश्च ॥ ५ ॥ वस्तेर्ढञ् । शिलाया ढः । शाखादिभ्यो यः । द्रव्यं च भव्ये । कुशाग्राच्छः । समा-साच्च तद्विषयात् । शर्करादिभ्योऽण् । अङ्गुल्यादिभ्यष्ठक् । एकशा-लायाष्ठजन्यतरस्याम् । कर्कलोहितादीकक् । प्रत्नपूर्वविश्वेमात्थाल्छ-न्दसि । पूगाञ्ञ्योऽग्रामणीपूर्वात् । व्रातच्फञोरस्त्रियाम् । आयुधजी-विसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् । वृकाट्टेण्यण् । दामन्यादित्रि-गर्तषष्ठाच्छः । पर्श्वादियौधेयादिभ्योऽणञौ । अभिजिद्विदभृच्छाला-वच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् । ञ्यादयस्तद्राजाः ॥ प्राग्दि-शोऽनद्यतने विभाषाज्य च जातिनाम्नो वस्तेरेकोनविंशतिः ॥

चतुर्थः पादः ।

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च । दण्डव्यवसर्गयोश्च । स्थूलादिभ्यः प्रकारवचने कन् । अनत्यन्तगतौ क्तात् । न सामिव-चने । बृहत्या आच्छादने । अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरप-दात्खः । विभाषाञ्चेरदिक्स्त्रियाम् । जात्यन्ताच्छ बन्धुनि । स्थाना-न्ताद्विभाषा सस्थानेनेति चेत् । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । अमु च च्छन्दसि । अनुगादिनष्ठक् । णचः स्त्रियामञ् । अणिनुणः । विसारिणो मत्स्ये । संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् । द्वि-त्रिचतुर्भ्यः सुच् । एकस्य सकृच्च । विभाषा बहोर्धाविप्रकृष्टकाले ॥ १ ॥ तत्प्रकृतवचने मयट् । समूहवच्च बहुषु । अनन्तावसथेति-हभेषजाञ्ञ्यः । देवतान्तात्तादर्थ्ये यत् । पादार्घाभ्यां च । अतिथे-र्ञ्यः । देवात्तल् । अवेः कः । यावादिभ्यः कन् । लोहितान्मणौ ।

SGDF Sri Gangeshwar Digital Foundation

वर्णे चानित्ये। रक्ते। कालाच्च। विनयादिभ्यष्ठक्। वाचो व्याहृतार्थायाम्। तद्युक्तात्कर्मणोऽण्। ओषधेरजातौ। प्रज्ञादिभ्यश्च। मृदस्तिकन्। सस्नौ प्रशंसायाम्॥२॥ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि। बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्। संख्यैकवचनाच्च वीप्सायाम्। प्रतियोगे पञ्चम्यास्तसिः। अपादाने चाहीयरुहोः। अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः। हीयमानपापयोगाच्च। षष्ठ्या व्याश्रये। रोगाच्चापनयने। अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। विभाषा साति कार्त्स्न्ये। अभिविधौ संपदा च। तदधीनवचने। देये त्रा च। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्। अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच्। कृञो द्वितीयतृतीयशम्बबीजात्कृषौ। संख्यायाश्च गुणान्तायाः। समयाच्च यापनायाम्॥३॥ सपत्रनिष्पत्रादतिव्यथने। निष्कुलान्निष्कोषणे। सुखप्रियादानुलोम्ये। दुःखात्प्रातिलोम्ये। शूलात्पाके। सत्यादशपथे। मद्रात्परिवापणे। समासान्ताः। न पूजनात्। किमः क्षेपे। नञस्तत्पुरुषात्। पथो विभाषा। बहुव्रीहौ संख्येये डजबहुगणात्। ऋक्पूरब्धूःपथामानक्षे। अच्प्रत्यन्ववपूर्वात्सामलोम्नः। अक्ष्णोऽदर्शनात्। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः। ब्रह्महस्तिभ्यां वर्चसः। अवसमन्धेभ्यस्तमसः। श्वसोऽवसीयःश्रेयसः॥४॥ अन्ववतप्ताद्रहसः। प्रतेरुरसः सप्तमीस्थात्। अनुगवमायामे। द्विस्तावा त्रिस्तावा वेदिः। उपसर्गादध्वनः। तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः। अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः। अह्नोऽह्न एतेभ्यः। न संख्यादेः समाहारे। उत्तमैकाभ्यां च। राजाहःसखिभ्यष्टच्। गोरतद्धितलुकि। अग्राख्यायामुरसः। अनोऽश्मायःसरसां जातिसंज्ञयोः। ग्रामकौटाभ्यां च तक्ष्णः। अतेः शुनः। उपमानादप्राणिषु। उत्तरमृगपूर्वाच्च सक्थ्नः। नावो द्विगोः। अर्धाच्च॥५॥ खार्याः प्राचाम्। द्वित्रिभ्यामञ्जलेः। अनसन्तान्नपुंसकाच्छन्दसि। ब्रह्मणो जानपदाख्यायाम्। कुमहद्भ्यामन्यतरस्याम्। द्वन्द्वाच्चुदषहान्तात्समाहारे। अव्ययीभावे शरत्प्र-

भृतिभ्यः । अनश्च । नपुंसकादन्यतरस्याम् । नदीपौर्णमास्याग्रहायणी-
भ्यः । झयः । गिरेश्च सेनकस्य । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् । अङ्गुलेर्दारुणि । द्वित्रिभ्यां ष मूर्ध्नः । अप्पूरणीप्रमाण्योः ।
अन्तर्बहिर्भ्यां च लोम्नः । अञ्नासिकायाः संज्ञायां नसं चास्थूलात् ।
उपसर्गाच्च । सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ।
॥ ६ ॥ नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् । नित्यमसिच्प्रजामे-
धयोः । बहुप्रजाश्छन्दसि । धर्मादनिच्केवलात् । जम्भा सुहरिततृण-
सोमेभ्यः । दक्षिणेर्मा लुब्धयोगे । इच्कर्मव्यतिहारे । द्विदण्ड्यादि-
भ्यश्च । प्रसम्भ्यां जानुनोर्ज्ञुः । ऊर्ध्वाद्विभाषा । ऊधसोऽनङ् ।
धनुषश्च । वा संज्ञायाम् । जायाया निङ् । गन्धस्येदुत्पूतिसुसुरभि-
भ्यः । अल्पाख्यायाम् । उपमानाच्च । पादस्य लोपोऽहस्त्यादिभ्यः ।
कुम्भपदीषु च । संख्यासुपूर्वस्य ॥ ७ ॥ वयसि दन्तस्य दतृ ।
छन्दसि च । स्त्रियां संज्ञायाम् । विभाषा श्यावारोकाभ्याम् । अ-
ग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च । ककुदस्यावस्थायां लोपः । त्रिककु-
त्पर्वते । उद्विभ्यां काकुदस्य । पूर्णाद्विभाषा । सुहृद्दुर्हृदौ मित्रामि-
त्रयोः । उरःप्रभृतिभ्यः कप् । इनः स्त्रियाम् । नद्यृतश्च । शेषा-
द्विभाषा । न संज्ञायाम् । ईयसश्च । वन्दिते भ्रातुः । ऋतश्छन्दसि ।
नाडीतन्त्र्योः स्वाङ्गे । निष्प्रवाणिश्च ॥ ८ ॥ पादशतस्य तत्प्रकृतवृ-
कज्येष्ठाभ्यां सपत्रान्ववतप्तात्खार्या नञ्दुःसुभ्यो वयसि विंशतिः ॥

इति पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

प्रथमः पादः ।

१ एकाचो द्वे प्रथमस्य । अजादेर्द्वितीयस्य । न न्द्राः संयोगा-
दयः । पूर्वोऽभ्यासः । उभे अभ्यस्तम् । जक्षित्यादयः षट् । तुजा-
दीनां दीर्घोऽभ्यासस्य । लिटि धातोरनभ्यासस्य । सन्यङोः ।
श्लौ । चङि । दाश्वान्साह्वान्मीढ्वांश्च । ष्यङः संप्रसारणं पुत्रपत्योस्त-
त्पुरुषे । बन्धुनि बहुव्रीहौ । वचिस्वपियजादीनां किति । ग्रहिज्या-

SGDF

वयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च। लिट्यभ्यासस्योभयेषाम्। स्वापेश्चङि। स्वपिस्यमिव्येञां यङि। न वशः॥ १॥ चायः की। स्फायः स्फी निष्ठायाम्। स्त्यः प्रपूर्वस्य। द्रवमूर्तिस्पर्शयोः श्यः। प्रतेश्च। विभाषाभ्यवपूर्वस्य। शृतं पाके। प्यायः पी। लिड्यङोश्च। विभाषा श्वेः। णौ च संश्चङोः। ह्वः संप्रसारणम्। अभ्यस्तस्य च। बहुलं छन्दसि। चायः की। अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्ताः। न संप्रसारणे संप्रसारणम्। लिटि वयो यः। वश्चास्यान्यतरस्यां किति। वेञः॥ २॥ ल्यपि च। ज्यश्च। व्यश्च। विभाषा परेः। आदेच उपदेशेऽशिति। न व्यो लिटि। स्फुरतिस्फुलत्योर्घञि। क्रीङ्जीनां णौ। सिध्यतेरपारलौकिके। मीनातिमिनोतिदीङां ल्यपि च। विभाषा लीयतेः। खिदेश्छन्दसि। अपगुरो णमुलि। चिस्फुरोर्णौ। प्रजने वीयतेः। बिभेतेर्हेतुभये। नित्यं स्मयतेः। सृजिदृशोर्झल्यमकिति। अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्। शीर्षंश्छन्दसि॥ ३॥ ये च तद्धिते। अचि शीर्षः। पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु। धात्वादेः षः सः। णो नः। लोपो व्योर्वलि। वेरपृक्तस्य। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। एङ्ह्रस्वात्संबुद्धेः। शेश्छन्दसि बहुलम्। ह्रस्वस्य पिति कृति तुक्। संहितायाम्। छे च। आङ्माङोश्च। दीर्घात्। पदान्ताद्वा। इको यणचि। एचोऽयवायावः। वान्तो यि प्रत्यये। धातोस्तन्निमित्तस्यैव॥ ४॥ क्षय्यजय्यौ शक्यार्थे। क्रय्यस्तदर्थे। भय्यप्रवय्ये चच्छन्दसि। एकः पूर्वपरयोः। अन्तादिवच्च। षत्वतुकोरसिद्धः। आद्गुणः। वृद्धिरेचि। एत्येधत्यूठ्सु। आटश्च। उपसर्गादृति धातौ। वा सुप्यापिशलेः। औतोम्शसोः। एङि पररूपम्। ओमाङोश्च। उस्यपदान्तात्। अतो गुणे। अव्यक्तानुकरणस्यात इतौ। नाम्रेडितस्यान्त्यस्य तु वा। नित्यमाम्रेडिते डाचि॥५॥ अकः सवर्णे दीर्घः। प्रथमयोः पूर्वसवर्णः। तस्माच्छसो नः पुंसि। नादिचि। दीर्घाज्जसि च। वा छन्दसि। अमि पूर्वः। संप्रसारणाच्च। एङः पदान्तादति। ङसिङसोश्च। ऋत उत्। ख्यत्यात्परस्य। अतो रोरप्लुतादप्लुते। हशि च। प्रकृत्यान्तःपादमव्यपरे। अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च। यजुष्युरः। आपो जुषाणो वृष्णो

SGDF Sri Gangadharendra Digital Foundation

वर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे । अङ्ग इत्यादौ च । अनुदात्ते च कुधपरे ॥ ६ ॥ अवपथासि च। सर्वत्र विभाषा गोः । अवङ् स्फोटायनस्य । इन्द्रे च नित्यम् । प्लुतप्रगृह्या अचि । आङोऽनुनासिकश्छन्दसि । इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च । ऋत्यकः । अप्लुतवदुपस्थिते । ई३ चाक्रवर्मणस्य । दिव उत् । एतत्तदोः सुलोपोऽकोरनञ्समासे हलि । स्यश्छन्दसि बहुलम् । सोऽचि लोपे चेत्पादपूरणम् । सुट्कात्पूर्वः । अडभ्यासव्यवायेऽपि । संपर्युपेभ्यः करोतौ भूषणे । समवाये च । उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु । किरतौ लवने॥७॥ हिंसायां प्रतेश्च । अपाच्चतुष्पाच्छकुनिष्वालेखने । कुस्तुम्बुरूणि जातिः । अपरस्पराः क्रियासातत्ये । गोष्पदं सेवितासेवितप्रमाणेषु । आस्पदं प्रतिष्ठायाम् । आश्चर्यमनित्ये । वर्चस्केऽवस्करः । अपस्करो रथाङ्गम् । विष्किरः शकुनिर्विकिरो वा । ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे । प्रतिष्कशश्च कशेः । प्रस्कण्वहरिश्चन्द्रावृषी । मस्करमस्करिणौ वेणुपरिव्राजकयोः । कास्तीराजस्तुन्दे नगरे । कारस्करो वृक्षः । पारस्करप्रभृतीनि च संज्ञायाम् । अनुदात्तं पदमेकवर्जम् । कर्षात्वतो घञोऽन्त उदात्तः । उञ्छादीनां च ॥ ८ ॥ अनुदात्तस्य च यत्रोदात्तलोपः। धातोः । चितः । तद्धितस्य । कितः । तिसृभ्यो जसः । चतुरः शसि । सावेकाचस्तृतीयादिर्विभक्तिः । अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे । अञ्चेश्छन्दस्यसर्वनामस्थानम् । ऊडिदंपदाद्यप्पुम्रैद्युभ्यः । अष्टनो दीर्घात् । शतुरनुमो नद्यजादी । उदात्तयणो हल्पूर्वात् । नोङ्धात्वोः । ह्रस्वनुड्भ्यां मतुप् । नामन्यतरस्याम् । ङ्याश्छन्दसि बहुलम् । षट्त्रिचतुर्भ्यो हलादिः । झल्युपोत्तमम्॥९॥विभाषा भाषायाम् । न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः । दिवो झल् । नृ चान्यतरस्याम् । तित्स्वरितम् । तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः । आदिः सिचोऽन्यतरस्याम् । स्वपादिर्हिंसामच्यनिटि । अभ्यस्तानामादिः । अनुदात्ते च। सर्वस्य सुपि । भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति । लिति । आदिर्णमुल्यन्यतरस्याम् । अचः कर्तृयकि । थलि च सेटीडन्तो वा । ञ्नित्यादिर्नित्यम् । आमन्त्रितस्य च । पथिमथोः सर्वनामस्थाने । अन्तश्च तवै युगपत् ॥ १० ॥ क्षयो निवासे ।

SGDF Sri Gargeshwari Digital Foundation

जयः करणम् । वृषादीनां च । संज्ञायामुपमानम् । निष्ठा च द्व्यजना-त् । शुष्कधृष्टौ । आशितः कर्ता । रिक्ते विभाषा । जुष्टार्पिते चच्छ-न्दसि । नित्यं मन्त्रे । युष्मदस्मदोर्ङसि । ङयि च । यतोऽनावः । ईडवन्दवृशंसदुहां ण्यतः । विभाषा वेण्विन्धानयोः । त्यागरागहास-कुहश्वठकुथानाम् । उपोत्तमं रिति । चङ्यन्यतरस्याम् । मतोः पूर्व-मात्संज्ञायां स्त्रियाम् । अन्तोऽवत्याः ॥ ११ ॥ ईवत्याः । चौ । स-मासस्य ॥ एकाचश्चायो ल्यपि च ये च क्षय्यजय्यावकः सवर्णेऽवप-थाहिंसायामनुदात्तस्य विभाषा क्षय ईवत्यास्त्रीणि ॥

द्वितीयः पादः ।

बहुव्रीहौ प्रकृत्या पूर्वपदम् । तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमा-नाव्ययद्वितीयाकृत्याः । वर्णो वर्णेष्वनेते । गाधलवणयोः प्रमाणे । दायाद्यं दायादे । प्रतिबन्धि चिरकृच्छ्रयोः । पदेऽपदेशे । निवाते वातत्राणे । शारदेऽनार्तवे । अध्वर्युकषाययोर्जातौ । सदृशप्रतिरूप-योः सादृश्ये । द्विगौ प्रमाणे । गन्तव्यपण्यं वाणिजे । मात्रोपज्ञोप-क्रमच्छाये नपुंसके । सुखप्रिययोर्हिते । प्रीतौ च । स्वं स्वामिनि । पत्यावैश्वर्ये । न भूवाक्चिद्दिधिषु । वा भुवनम् ॥ १ ॥ आशङ्काबाध-नेदीयःसु संभावने । पूर्वे भूतपूर्वे । सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये । विस्पष्टादीनि गुणवचनेषु । श्रज्यावमकन्पापवत्सु भावे क-र्मधारये । कुमारश्च । आदिः प्रत्येनसि । पूगेष्वन्यतरस्याम् । इगन्त-कालकपालभगालशरावेषु द्विगौ । बह्वन्यतरस्याम् । दिष्टिवितस्त्योः-श्च । सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् । परिप्रत्युपापा वर्ज्यमाना-होरात्रावयवेषु । राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु । संख्या । आ-चार्योपसर्जनश्चान्तेवासी । कार्तकौजपादयश्च । महान्व्रीह्यपराह्णगृष्टी-ष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु । क्षुल्लकश्च वैश्वदेवे । उष्ट्रः सादिवाम्योः ॥ २ ॥ गौः सादसादिसारथिषु । कुरुगार्हपत-रिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च । चतुर्थी तदर्थे । अर्थे । क्ते च । कर्मधारयेऽनिष्ठा । अहीने द्वितीया । तृतीया कर्मणि । गतिरनन्तरः । तादौ च निति कृत्यतौ । तवै चान्तश्च युगपत् । अनिगन्तोऽञ्चतौ वप्रत्यये । न्यधी

SGDF

च । ईषदन्यतरस्याम् । हिरण्यपरिमाणं धने । प्रथमोऽचिरोपसंपत्तौ । कतरकतमौ कर्मधारये । आर्यो ब्राह्मणकुमारयोः । राजा च । षष्ठी प्रत्येनसि ॥ ३ ॥ क्ते नित्यार्थे । ग्रामः शिल्पिनि । राजा च प्रशंसायाम् । आदिरुदात्तः । सप्तमीहारिणौ धर्म्येऽहरणे । युक्ते च । विभाषाध्यक्षे । पापं च शिल्पिनि । गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे । अङ्गानि मैरेये । भक्ताख्यास्तदर्थेषु । गोबिडालसिंहसैन्धवेषूपमाने । अके जीविकार्थे । प्राचां क्रीडायाम् । अणि नियुक्ते । शिल्पिनि चाकृञः । संज्ञायां च । गोतन्तियवं पाले । णिनि । उपमानं शब्दार्थप्रकृतावेव ॥ ४ ॥ युक्तारोह्यादयश्च । दीर्घकाशतुषभ्राष्ट्रवटं ज । अन्त्यात्पूर्वं बह्वचः । ग्रामेऽनिवसन्तः । घोषादिषु च । छात्र्यादयः शालायाम् । प्रस्थेऽवृद्धमकर्क्यादीनाम् । मालादीनां च । अमहन्नवं नगरेऽनुदीचाम् । अर्मे चावर्णं द्व्यच्त्र्यच् । न भूताधिकसंजीवमद्राश्मकज्जलम् । अन्तः । सर्वं गुणकार्त्स्न्ये । संज्ञायां गिरिनिकाययोः । कुमार्यां वयसि । उदकेऽकेवले । द्विगौ क्रतौ । सभायां नपुंसके । पुरे प्राचाम् । अरिष्टगौडपूर्वे च ॥ ५ ॥ न हास्तिनफलकमार्देयाः । कुसूलकूपकुम्भशालं बिले । दिक्छब्दा ग्रामजनपदाख्यानचानराटेषु । आचार्योपसर्जनश्चान्तेवासिनि । उत्तरपदवृद्धौ सर्वं च । बहुव्रीहौ विश्वं संज्ञायाम् । उदराश्वेषुषु । क्षेपे । नदी बन्धुनि । निष्ठोपसर्गपूर्वमन्यतरस्याम् । उत्तरपदादिः । कर्णो वर्णलक्षणात् । संज्ञौपम्ययोश्च । कण्ठपृष्ठग्रीवाजङ्घं च । शृङ्गमवस्थायां च । नञो जरमरमित्रमृताः । सोर्मनसी अलोमोषसी । क्त्वादयश्च । आद्युदात्तं द्व्यच्छन्दसि । वीरवीर्यौ च ॥ ६ ॥ कूलतीरतूलमूलशालाक्षसममव्ययीभावे । कंसमन्थशूर्पपाय्यकाण्डं द्विगौ । तत्पुरुषे शालायां नपुंसके । कन्था च । आदिश्चिहणादीनाम् । चेलखेटकटुककाण्डं गर्हायाम् । चीरमुपमानम् । पललसूपशाकं मिश्रे । कूलसूदस्थलकर्षाः संज्ञायाम् । अकर्मधारये राज्यम् । वर्ग्यादयश्च । पुत्रः पुम्भ्यः । नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः । चूर्णादीन्यप्राणिषष्ठ्याः । षट्च काण्डादीनि । कुण्डं वनम् । प्रकृत्या भगालम् । शितेर्नित्याबह्वज्बहुव्रीहावभसत् । गतिकारकोपपदात्कृत् । उभे वनस्पत्यादिषु युगपत् ॥ ७ ॥ देवताद्वन्द्वे च । नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु । अन्तः । था-

SGDF Sri Gargeshwari Digital Foundation

थवन्क्ताजबित्रकाणाम् । सूपमानात्क्तः । संज्ञायामनाचितादीनाम् । प्रवृद्धादीनां च । कारकाद्दत्तश्रुतयोरेवाशिषि । इत्थंभूतेन कृतमिति च । अनो भावकर्मवचनः । मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः । सप्तम्याः पुण्यम् । ऊनार्थकलहं तृतीयायाः । मिश्रं चानुपसर्गमसंधौ । नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः । ययतोश्चातदर्थे । अच्कावशक्तौ । आक्रोशे च । संज्ञायाम् । कृत्योकेष्णुच्चार्वादयश्च ॥ ८ ॥ विभाषा तृन्नन्नतीक्ष्णशुचिषु । बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने । संख्यायाः स्तनः । विभाषा छन्दसि । संज्ञायां मित्राजिनयोः । व्यवायिनोऽन्तरम् । मुखं स्वाङ्गम् । नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः । निष्ठोपमानादन्यतरस्याम् । जातिकालसुखादिभ्योऽनाच्छादनात्क्तोऽकृतमितप्रतिपन्नाः । वा जाते । नञ्सुभ्याम् । कपि पूर्वम् । ह्रस्वान्तेऽन्त्यात्पूर्वम् । बहोर्नञ्वदुत्तरपदभूम्नि । न गुणादयोऽवयवाः । उपसर्गात्स्वाङ्गं ध्रुवमपर्शु । वनं समासे । अन्तः । अन्तश्च ॥९॥ न निविभ्याम् । परेरभितोभाविमण्डलम् । प्रादस्वाङ्गं संज्ञायाम् । निरुदकादीनि च । अभेर्मुखम् । अपाच्च । स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च । अधेरुपरिस्थम् । अनोरप्रधानकनीयसी । पुरुषश्चान्वादिष्टः । अतेरकृत्पदे । नेरनिधाने । प्रतेरंश्वादयस्तत्पुरुषे । उपाद्द्व्यजजिनमगौरादयः । सोरवक्षेपणे । विभाषोत्पुच्छे । द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ । सक्थं चाक्रान्तात् । परादिश्छन्दसि बहुलम् ॥ बहुव्रीहावाशङ्कागौः सादक्ते नित्यार्थे युक्तान हास्तिनकूलतीरदेवताविभाषा न निव्येकोनविंशतिः ॥

तृतीयः पादः ।

अलुगुत्तरपदे । पञ्चम्याः स्तोकादिभ्यः । ओजःसहोम्भस्तमसस्तृतीयायाः । मनसः संज्ञायाम् । आज्ञायिनि च । आत्मनश्च पूरणे । वैयाकरणाख्यायां चतुर्थ्याः । परस्य च । हलदन्तात्सप्तम्याः संज्ञायाम् । कारनाम्नि च प्राचां हलादौ । मध्याद्गुरौ । अमूर्धमस्तकात्स्वाङ्गादकामे । बन्धे च विभाषा । तत्पुरुषे कृति बहुलम् । प्रावृट्शरत्कालदिवां जे । विभाषा वर्षक्षरशरवरात् । घकालतनेषु कालनाम्नः । शयवासवासिष्वकालात् । नेन्सिद्धबध्नातिषु च । स्थे च भाषाया-

म् ॥ १ ॥ षष्ठ्या आक्रोशे । पुत्रेऽन्यतरस्याम् । ऋतो विद्यायोनिसंबन्धेभ्यः । विभाषा स्वसृपत्योः । आनङृतो द्वन्द्वे । देवताद्वन्द्वे च । ईदग्नेः सोमवरुणयोः । इद्वृद्धौ । दिवो द्यावा । दिवसश्च पृथिव्याम् । उषासोषसः । मातरपितरावुदीचाम् । पितरामातरा चच्छन्दसि । स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु । तसिलादिष्वा कृत्वसुचः । क्यङ्मानिनोश्च । न कोपधायाः । संज्ञापूरण्योश्च । वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे । स्वाङ्गाच्चेतोऽमानिनि ॥ २ ॥ जातेश्च । पुंवत्कर्मधारयजातीयदेशीयेषु । घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः । नद्याः शेषस्यान्यतरस्याम् । उगितश्च । आन्महतः समानाधिकरणजातीययोः । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः । त्रेस्त्रयः । विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् । हृदयस्य हृल्लेखयदण्लासेषु । वा शोकष्यञ्रोगेषु । पादस्य पदाज्यातिगोपहतेषु । पद्यत्यतदर्थे । हिमकाषिहतिषु च । ऋचः शे । वा घोषमिश्रशब्देषु । उदकस्योदः संज्ञायाम् । पेषंवासवाहनधिषु च । एकहलादौ पूरयितव्येऽन्यतरस्याम् । मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ॥ ३ ॥ इको ह्रस्वोऽङ्यो गालवस्य । एक तद्धिते च । ङ्यापोः संज्ञाछन्दसोर्बहुलम् । त्वे च । इष्टकेषीकामालानां चिततूलभारिषु । खित्यनव्ययस्य । अरुर्द्विषदजन्तस्य मुम् । इच एकाचोऽम्प्रत्ययवच्च । वाचंयमपुरंदरौ च । कारे सत्यागदस्य । श्येनतिलस्य पाते ञे । रात्रेः कृति विभाषा । नलोपो नञः । तस्मान्नुडचि । नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या । एकादिश्चैकस्य चादुक् । नगोऽप्राणिष्वन्यतरस्याम् । सहस्य सः संज्ञायाम् । ग्रन्थान्ताधिके च । द्वितीये चानुपाख्ये ॥ ४ ॥ अव्ययीभावे चाकाले । वोपसर्जनस्य । प्रकृत्याशिष्यगोवत्सहलेषु । समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु । ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु । चरणे ब्रह्मचारिणि । तीर्थे ये । विभाषोदरे । दृग्दृश्वतुषु । इदंकिमोरीश्की । आ सर्वनाम्नः । विश्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये । समः समि । तिरसस्तिर्यलोपे । सहस्य सध्रिः । सध मादस्थयोश्छन्दसि । द्व्यन्तरुपसर्गे-

SGDF Sri Gurudeshwari Digital Foundation

भ्योऽप ईत् । ऊदनोर्देशे । अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकारगच्छेषु । अर्थे विभाषा ॥ ९ ॥ कोः कत्तत्पुरुषेऽचि । रथवदयोश्च । तृणे च जातौ । का पथ्यक्षयोः । ईषदर्थे । विभाषा पुरुषे । कवं चोष्णे । पथि च च्छन्दसि । पृषोदरादीनि यथोपदिष्टम् । संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ । ढ्लोपे पूर्वस्य दीर्घोऽणः । सहिवहोरोदवर्णस्य । साढ्यै साढ्वा साढेति निगमे । संहितायाम् । कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य । नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ । वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् । वले । मतौ बह्वचोऽनजिरादीनाम् । शरादीनां च ॥ ६ ॥ इको वहेऽपीलोः । उपसर्गस्य घञ्यमनुष्ये बहुलम् । इकः काशे । दस्ति । अष्टनः संज्ञायाम् । छन्दसि च । चितेः कपि । विश्वस्य वसुराटोः । नरे संज्ञायाम् । मित्रे चर्षौ । मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ । ओषधेश्च विभक्तावप्रथमायाम् । ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् । इकः सुञि । द्व्यचोऽतस्तिङः । निपातस्य च । अन्येषामपि दृश्यते । चौ । संप्रसारणस्य ॥ अलुक्छ्चा जातेरिकोऽव्ययीभावे कोः कत्तादिको वह एकोनविंशतिः ॥

चतुर्थः पादः ।

अङ्गस्य । हलः । नामि । न तिसृचतसृ । छन्दस्युभयथा । नृ च । नोपधायाः । सर्वनामस्थाने चासंबुद्धौ । वा षपूर्वस्य निगमे । सान्तमहतः संयोगस्य । अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् । इन्हन्पूषार्यम्णां शौ । सौ च । अत्वसन्तस्य चाधातोः । अनुनासिकस्य क्विझलोः क्ङिति । अज्झनगमां सनि । तनोतेर्विभाषा । क्रमश्च क्त्वि । च्छ्वोः शूडनुनासिके च । ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥ १ ॥ राल्लोपः । असिद्धवदत्रा भात् । श्नान्नलोपः । अनिदितां हल उपधायाः क्ङिति । दंशसञ्जस्वञ्जां शपि । रञ्जेश्च । घञि च भावकरणयोः । स्यदो जवे । अवोदैधौद्मप्रश्रथहिमश्रथाः । नाञ्चेः पूजायाम् । क्त्वि स्कन्दस्यन्दोः । जान्तनशां विभाषा । भञ्जेश्च चिणि । शास इदङ्हलोः । शा हौ । हन्तेर्जः । अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति । वा ल्यपि । न क्तिचि दीर्घश्च । गमः क्वौ ॥२॥ विड्वनो-

रनुनासिकस्यात् । जनसनखनां सञ्झलोः । ये विभाषा । तनोतेर्यकि ।
सनः क्तिचि लोपश्चास्यान्यतरस्याम् । आर्धधातुके । भ्रस्जो रोपधयो
रमन्यतरस्याम् । अतो लोपः । यस्य हलः । क्यस्य विभाषा । णे-
रनिटि । निष्ठायां सेटि । जनिता मन्त्रे । शमिता यज्ञे । अयामन्ता-
ल्वाय्येत्न्विष्णुषु । ल्यपि लघुपूर्वात् । विभाषापः । युप्लुवोर्दीर्घश्छन्दसि ।
क्षियः । निष्ठायामण्यदर्थे ॥३॥ वाक्रोशदैन्ययोः । स्यसिच्सीयुट्तासि-
षु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च । दीङो युडचि
क्ङिति । आतो लोप इटि च । ईद्यति । घुमास्थागापाजहातिसां हलि ।
एर्लिङि । वान्यस्य संयोगादेः । न ल्यपि । मयतेरिदन्यतरस्याम् । लुङ्लङ्-
लृङ्क्ष्वडुदात्तः । आडजादीनाम् । छन्दस्यपि दृश्यते । न माङ्योगे । बहुलं
छन्दस्यमाङ्योगेऽपि । इरयो रे । अचि श्नुधातुभ्रुवां य्वोरियङुवङौ । अ-
भ्यासस्यासवर्णे । स्त्रियाः । वाम्शसोः ॥४॥ इणो यण् । एरनेकाचोऽसंयो-
गपूर्वस्य । ओः सुपि । वर्षाभ्वश्च । न भूसुधियोः । छन्दस्युभयथा । हुश्नुवोः
सार्वधातुके । भुवो वुग्लुङ्लिटोः । ऊदुपधाया गोहः । दोषो णौ । वा चित्तवि-
रागे । मितां ह्रस्वः । चिण्णमुलोर्दीर्घोऽन्यतरस्याम् । खचि ह्रस्वः । ह्लादो
निष्ठायाम् । छादेर्घेऽद्व्युपसर्गस्य । इस्मन्त्रन्क्विषु च । गमहनजनखनघसां
लोपः क्ङित्यनङि । तनिपत्योश्छन्दसि । घसिभसोर्हलि च ॥ ५ ॥ हु-
झल्भ्यो हेर्धिः । श्रुशृणुपॄकृवृभ्यश्छन्दसि । अङितश्च । चिणो लुक् ।
अतो हेः । उतश्च प्रत्ययादसंयोगपूर्वात् । लोपश्चास्यान्यतरस्यां म्वोः ।
नित्यं करोतेः । ये च । अत उत्सार्वधातुके । श्नसोरल्लोपः । श्नाभ्य-
स्तयोरातः । ई हल्यघोः । इद्दरिद्रस्य । भियोऽन्यतरस्याम् । जहा-
तेश्च । आ च हौ । लोपो यि । घ्वसोरेद्धावभ्यासलोपश्च । अत एकह-
ल्मध्येऽनादेशादेर्लिटि ॥६॥ थलि च सेटि । तॄफलभजत्रपश्च । रा-
धो हिंसायाम् । वा जॄभ्रमुत्रसाम् । फणां च सप्तानाम् । न शसदद-
वादिगुणानाम् । अर्वणस्त्रसावनञः । मघवा बहुलम् । भस्य । पादः
पत् । वसोः संप्रसारणम् । वाह ऊठ् । श्वयुवमघोनामतद्धिते । अल्लो-
पोऽनः । षपूर्वहन्धृतराज्ञामणि । विभाषा ङिश्योः । न संयोगाद्वमन्ता-
त् । अचः । उद ईत् । आतो धातोः ॥७॥ मन्त्रेष्वाङ्यादेरात्मनः । ति विं-
शतेर्डिति । टेः । नस्तद्धिते । अह्नष्टखोरेव । ओर्गुणः । ढे लोपोऽकद्र्वाः ।

यस्येति च । सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः। हलस्तद्धितस्य । आपत्यस्य च तद्धितेऽनाति । क्यच्व्योश्च । बिल्वकादिभ्यश्छस्य लुक्। तुरिष्ठेमेयःसु । टेः । स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परं पूर्वस्य च गुणः । प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः । बहोर्लोपो भू च बहोः । इष्ठस्य यिट् च । ज्यादादीयसः ॥ ८ ॥ र ऋतो हलादेर्लघोः । विभाषर्जोश्छन्दसि । प्रकृत्यैकाच् । इनण्यनपत्ये । गाथिविदथिकेशिगणिपणिनश्च । संयोगादिश्च । अन् । ये चाभावकर्मणोः । आत्माध्वानौ खे । न मपूर्वोऽपत्येऽवर्मणः । ब्राह्मोऽजातौ । कार्मस्ताच्छील्ये । औक्षमनपत्ये । दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि ॥ अङ्गस्य राल्लोपो विड्वनोर्वाक्रोशेणो यण्हुझल्भ्यस्थलि च मन्त्रेषु र ऋतः पञ्चदश ॥

इति षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

प्रथमः पादः ।

युवोरनाकौ । आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् । झोऽन्तः । अदभ्यस्तात् । आत्मनेपदेष्वनतः । शीङो रुट् । वेत्तेर्विभाषा । बहुलं छन्दसि । अतो भिस ऐस् । बहुलं छन्दसि । नेदमदसोरकोः । टाङसिङसामिनात्स्याः । ङेर्यः । सर्वनाम्नः स्मै । ङसिङ्योः स्मात्स्मिनौ । पूर्वादिभ्यो नवभ्यो वा । जसः शी । औङ आपः। नपुंसकाच्च । जःशसोः शिः ॥१॥ अष्टाभ्य औश् । षड्भ्यो लुक् । स्वमोर्नपुंसकात् । अतोऽम् । अद्ड्डतरादिभ्यः पञ्चभ्यः। नेतराच्छन्दसि। युष्मदस्मद्भ्यां ङसोऽश् । ङेप्रथमयोरम् । शसो न । भ्यसोऽभ्यम् । पञ्चम्या अत् । एकवचनस्य च । साम आकम् । आत औ णलः । तुह्योस्तातङाशिष्यन्यतरस्याम् । विदेः शतुर्वसुः। समासेऽनञ्पूर्वे क्त्वो ल्यप्। क्त्वापि च्छन्दसि । सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः। अमो मश् ॥२॥ लोपस्त आत्मनेपदेषु । ध्वमो ध्वात् । यजध्वैनमिति च ।

तस्य तात् । तप्तनप्तनथनाश्च । इदन्तो मसि । क्त्वो यक् । इष्ट्वीनमिति च । स्नात्व्यादयश्च । आज्जसेरसुक् । अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि । आमि सर्वनाम्नः सुट् त्रेस्त्रयः । ह्रस्वनद्यापो नुट् । षट्चतुर्भ्यश्च । श्रीग्रामण्योश्छन्दसि । गोः पादान्ते । इदितो नुम्धातोः । शे मुचादीनाम् । मस्जिनशोर्झलि ॥ ३ ॥ रधिजभोरचि । नेट्यलिटि रधेः । रभेरशब्लिटोः । लभेश्च । आङो यि । उपात्प्रशंसायाम् । उपसर्गात्खल्घञोः । न सुदुर्भ्यां केवलाभ्याम् । विभाषा चिण्णमुलोः । उगिदचां सर्वनामस्थानेऽधातोः । युजेरसमासे । नपुंसकस्य झलचः । इकोऽचि विभक्तौ । तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य । अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः । छन्दस्यपि दृश्यते । ई च द्विवचने । नाभ्यस्ताच्छतुः । वा नपुंसकस्य । आच्छीनद्योर्नुम् ॥ ४ ॥ शप्श्यनोर्नित्यम् । सावनडुहः । दृक्स्ववःस्वतवसां छन्दसि । दिव औत् । पथिमथ्यृभुक्षामात् । इतोऽत्सर्वनामस्थाने । थो न्थः । भस्य टेर्लोपः । पुंसोऽसुङ् । गोतो णित् । णलुत्तमो वा । सख्युरसंबुद्धौ । अनङ् सौ । ऋदुशनस्पुरुदंशोनेहसां च । तृज्वत्क्रोष्टुः । स्त्रियां च । विभाषा तृतीयादिष्वचि । चतुरनडुहोरामुदात्तः । अम्संबुद्धौ । ऋत इद्धातोः ॥ ५ ॥ उपधायाश्च । उदोष्ठ्यपूर्वस्य । बहुलं छन्दसि ॥ युवोरष्टाभ्यो लोपो रधिशप्श्यनोरुपधायास्त्रीणि ॥

द्वितीयः पादः ।

सिचि वृद्धिः परस्मैपदेषु । अतो ल्रान्तस्य । वदव्रजहलन्तस्याचः । नेटि । ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् । ऊर्णोतेर्विभाषा । अतो हलादेर्लघोः । नेड्वशि कृति । तितुत्रतथसिसुसरकसेषु च । एकाच उपदेशेऽनुदात्तात् । श्र्युकः किति । सनि ग्रहगुहोश्च । कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि । श्वीदितो निष्ठायाम् । यस्य विभाषा । आदितश्च । विभाषा भावादिकर्मणोः । क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु । धृषिशसी वैयात्ये । दृढः स्थूलबलयोः ॥ १ ॥ प्रभौ परिवृढः । कृच्छ्रगहनयोः कषः । घुषिरविशब्दने । अर्देः संनिविभ्यः । अभेश्चाविदूर्ये । णेरध्ययने वृत्तम् । वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः । रुष्यमत्वरसंघुषास्वनाम् । हृषेर्लोमसु । अपचितश्च । हु ह्वरेश्छन्दसि । अ-

परिहृताश्च । सोमे ह्वरितः । ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिवमित्यमितीति च । आर्धधातुकस्येड्वलादेः । स्नुक्रमोरनात्मनेपदनिमित्ते । ग्रहोऽलिटि दीर्घः । वृतो वा । न लिङि । सिचि च परस्मैपदेषु ॥२॥ इट्सनि वा । लिङ्सिचोरात्मनेपदेषु । ऋतश्च संयोगादेः । स्वरतिसूतिसूयतिधूञूदितो वा । रधादिभ्यश्च । निरः कुषः । इण्निष्ठायाम् । तीषसहलुभरुषरिषः । सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् । क्लिशः क्त्वानिष्ठयोः । पूङश्च । वसतिक्षुधोरिट् । अञ्चेः पूजायाम् । लुभो विमोहने । जॄव्रश्च्योः क्त्वि । उदितो वा । सेऽसिचि कृतचृतच्छृदतृदनृतः । गमेरिट्परस्मैपदेषु । न वृद्भ्यश्चतुर्भ्यः । तासि च क्लृपः॥ ३ ॥ अचस्तास्वत्थल्यनिटो नित्यम् । उपदेशेऽत्वतः । ऋतो भारद्वाजस्य । बभूथाततन्थ जगृभ्म ववर्थेति निगमे । विभाषा सृजिदृशोः। इडत्त्यर्तिव्ययतीनाम् । वस्वेकाजाद्घसाम् । विभाषा गमहनविदविशाम् । सनिंससनिवांसम् । ऋद्धनोः स्ये । अञ्जेः सिचि । स्तुसुधूञ्भ्यः परस्मैपदेषु । यमरमनमातां सक्च । स्मिपूङ्रञ्ज्वशां सनि । किरश्च पञ्चभ्यः । रुदादिभ्यः सार्वधातुके । ईशः से । ईडजनोर्ध्वे च । लिङः सलोपोऽनन्त्यस्य । अतो येयः ॥ ४ ॥ आतो ङितः । आने मुक् । ईदासः । अष्टन आ विभक्तौ । रायो हलि । युष्मदस्मदोरनादेशे । द्वितीयायां च । प्रथमायाश्च द्विवचने भाषायाम् । योऽचि । शेषे लोपः । मपर्यन्तस्य । युवावौ द्विवचने । यूयवयौ जसि । त्वाहौ सौ । तुभ्यमह्यौ ङयि । तवममौ ङसि । त्वमावेकवचने । प्रत्ययोत्तरपदयोश्च । त्रिचतुरोः स्त्रियां तिसृचतसृ । अचि र ऋतः ॥ ५ ॥ जराया जरसन्यतरस्याम् । त्यदादीनामः । किमः कः । कु तिहोः । क्वाति । तदोः सः सावनन्त्ययोः । अदस औ सुलोपश्च । इदमो मः । दश्च । यः सौ । इदोऽय्पुंसि । अनाप्यकः । हलि लोपः । मृजेर्वृद्धिः । अचो ञ्णिति । अत उपधायाः । तद्धितेष्वचामादेः । किति च ॥ सिचि प्रभाविड्सन्यचस्तास्वदातो जराया अष्टादश ॥

तृतीयः पादः ।

देविकाशिंशपादित्यवाड्दीर्घसत्त्रश्रेयसामात् । केकयमित्त्रयुप्रलयानां

SGDF

यादेरियः । न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् । द्वारादीनां च । न्यग्रोधस्य च केवलस्य । न कर्मव्यतिहारे । स्वागतादीनां च । श्वादेरिञि । पदान्तस्यान्यतरस्याम् । उत्तरपदस्य । अवयवादृतोः । सुसर्वार्धाज्जनपदस्य । दिशोऽमद्राणाम् । प्राचां ग्रामनगराणाम् । संख्यायाः संवत्सरसंख्यस्य च । वर्षस्याभविष्यति । परिमाणान्तस्यासंज्ञाशाणयोः । जे प्रोष्ठपदानाम् । हृद्भगसिन्ध्वन्ते पूर्वपदस्य च । अनुशतिकादीनां च ॥ १ ॥ देवताद्वन्द्वे च । नेन्द्रस्य परस्य । दीर्घाच्च वरुणस्य । प्राचां नगरान्ते । जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् । अर्धात्परिमाणस्य पूर्वस्य तु वा । नातः परस्य । प्रवाहणस्य ढे । तत्प्रत्ययस्य च । नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् । यथातथयथापुरयोः पर्यायेण । हनस्तोऽचिण्णलोः । आतो युक्चिण्कृतोः । नोदात्तोपदेशस्य मान्तस्यानाचमेः । जनिवध्योश्च । अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ । शाछासाह्वाव्यावेपां युक् । वो विधूनने जुक् । लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने । भियो हेतुभये षुक् ॥ २ ॥ स्फायो वः । शदेरगतौ तः । रुहः पोऽन्यतरस्याम् । प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः । न यासयोः । उदीचामातः स्थाने यकपूर्वायाः । भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि । अभाषितपुंस्काच्च । आदाचार्याणाम् । ठस्येकः । इसुसुक्तान्तात्कः । चजोः कु घिण्यतोः । न्यङ्क्वादीनां च । हो हन्तेर्ञ्णिन्नेषु । अभ्यासाच्च । हेरचङि । सन्लिटोर्जेः । विभाषा चेः । न क्वादेः । अजिव्रज्योश्च ॥ ३ ॥ भुजन्युब्जौ पाण्युपतापयोः । प्रयाजानुयाजौ यज्ञाङ्गे । वञ्चेर्गतौ । ओक उचः के । ण्य आवश्यके । यजयाचरुचप्रवचर्चश्च । वचोऽशब्दसंज्ञायाम् । प्रयोज्यानियोज्यौ शक्यार्थे । भोज्यं भक्ष्ये । घोर्लोपो लेटि वा । ओतः श्यनि । क्सस्याचि । लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये । शमामष्टानां दीर्घः श्यनि । ष्ठिवुक्लमुचमां शिति । क्रमः परस्मैपदेषु । इषुगमियमां छः । पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः । ज्ञाजनोर्जा । प्वादीनां ह्रस्वः ॥ ४ ॥ मीनातेर्निगमे । मिदेर्गुणः । जुसि च । सार्वधातुकार्धधातुकयोः । जाग्रोऽविचिण्णल्ङित्सु । पुगन्तलघूपधस्य च । नाभ्यस्तस्याचि पिति सार्वधातुके । भूसुवोस्तिङि । उतो वृद्धिर्लुकि हलि ।

SGDF Sri Gurudev... Digital Foundation

ऊर्णोतेर्विभाषा । गुणोऽपृक्ते । तृणह इम् । ब्रुव ईट् । यङो वा ।
तुरुस्तुशम्यमः सार्वधातुके । अस्तिसिचोऽपृक्ते । बहुलं छन्दसि । रु-
दश्च पञ्चभ्यः । अड्गार्ग्यगालवयोः । अदः सर्वेषाम् ॥ ९ ॥ अतो
दीर्घो यञि । सुपि च । बहुवचने झल्येत् । ओसि च । आङि चा-
पः । संबुद्धौ च । अम्बार्थनद्योर्ह्रस्वः । ह्रस्वस्य गुणः । जसि च ।
ऋतो ङिसर्वनामस्थानयोः । घेर्ङिति । आण्नद्याः । याडापः । सर्व-
नाम्नः स्याड्ढ्रस्वश्च । विभाषा द्वितीयातृतीयाभ्याम् । ङेराम्नद्याम्नी-
भ्यः । इदुद्भ्याम् । औत् । अच्च घेः । आङो नास्त्रियाम् ॥ ६ ॥
देविकादेवतास्फायो भुजमीनातेरतो दीर्घो विंशतिः ॥

चतुर्थः पादः ।

णौ चङ्युपधाया ह्रस्वः । नाग्लोपिशास्वृदिताम् । भ्राजभास-
भाषदीपजीवमीलपीडामन्यतरस्याम् । लोपः पिबतेरीच्चाभ्यासस्य ।
तिष्ठतेरित् । जिघ्रतेर्वा । उरृत् । नित्यं छन्दसि । दयतेर्दिगि लिटि ।
ऋतश्च संयोगादेर्गुणः । ऋच्छत्यृताम् । शृदृप्रां ह्रस्वो वा । केऽणः ।
न कपि । आपोऽन्यतरस्याम् । ऋदृशोऽङि गुणः । अस्यतेस्थुक् ।
श्वयतेरः । पतः पुम् । वच उम् ॥ १ ॥ शीङः सार्वधातुके गुणः ।
अयङ् यि क्ङिति । उपसर्गाद्ध्रस्व ऊहतेः । एतेर्लिङि । अकृत्सार्वधातु-
कयोर्दीर्घः । च्वौ च । रीङृतः । रिङ्शयग्लिङ्क्षु । गुणोऽर्तिसंयोगाद्योः ।
यङि च । ई घ्राध्मोः । अस्य च्वौ । क्यचि च । अशनायोदन्यध-
नाया बुभुक्षापिपासागर्धेषु । नच्छन्दस्यपुत्रस्य । दुरस्युर्द्रविणस्युर्वृष-
ण्यति रिषण्यति । अश्वाघस्यात् । देवसुम्नयोर्यजुषि काठके । क-
व्यध्वरपृतनस्यर्चि लोपः । द्यतिस्यतिमास्थामि ति किति ॥ २ ॥
शाच्छोरन्यतरस्याम् । दधातेर्हिः । जहातेश्च क्त्वि । विभाषा छन्दसि ।
सुधित वसुधित नेमधित धिष्व धिषीय च । दो दद्घोः । अच उप-
सर्गात्तः । अपो भि । सः स्यार्धधातुके । तासस्त्योर्लोपः । रि च ।
ह एति । यीवर्णयोर्दीधीवेव्योः । सनि मीमाघुरभलभशकपतपदा-
मच इस् । आप्ज्ञप्यृधामीत् । दम्भ इच्च । मुचोऽकर्मकस्य गुणो
वा । अत्र लोपोऽभ्यासस्य । ह्रस्वः । हलादिः शेषः ॥ ३ ॥
शर्पूर्वाः खयः । कुहोश्चुः । न कवतेर्यङि । कृषेश्छन्दसि । दा-

घार्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यद्दत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च । उरत् । द्युतिस्वाप्योः संप्रसारणम् । व्यथो लिटि । दीर्घ इणः किति । अत आदेः । तस्मान्नुड्द्विहलः । अश्नोतेश्च । भवतेरः । ससूवेति निगमे । निजां त्रयाणां गुणः श्लौ । भृञामित् । अर्तिपिपर्त्योश्च । बहुलं छन्दसि । सन्यतः । ओः पुयण्ज्यपरे ॥४॥ स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा । गुणो यङ्लुकोः । दीर्घोऽकितः । नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् । नुगतोऽनुनासिकान्तस्य । जपजभदहदशभञ्जपशां च । चरफलोश्च । उत्परस्यातः । ति च । रीगृदुपधस्य च । रुग्रिकौ च लुकि । ऋतश्च । सन्वल्लघुनि चङ्परेऽनग्लोपे । दीर्घो लघोः । अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम् । विभाषा वेष्टिचेष्टयोः । ई च गणः ॥ णौ चश्रीङः शाछो शर्पूर्वाः स्रवतिसप्तदश ॥

इति सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

प्रथमः पादः ।

सर्वस्य द्वे । तस्य परमाम्रेडितम् । अनुदात्तं च । नित्यवीप्सयोः । परेर्वर्जने । प्रसमुपोदः पादपूरणे । उपर्यध्यधसः सामीप्ये । वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु । एकं बहुव्रीहिवत् । आबाधे च । कर्मधारयवदुत्तरेषु । प्रकारे गुणवचनस्य । अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् । यथास्वे यथायथम् । द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु । पदस्य । पदात् । अनुदात्तं सर्वमपादादौ । आमन्त्रितस्य च । युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ॥ १ ॥ बहुवचनस्य वस्नसौ । तेमयावेकवचनस्य । त्वामौ द्वितीयायाः । न चवाहाहैवयुक्ते । पश्यार्थैश्चानालोचने । सपूर्वायाः प्रथमाया विभाषा । तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ।

तिङ्ङतिङः । न लुट् । निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् । नह प्रत्यारम्भे । सत्यं प्रश्ने । अङ्गाप्रातिलोम्ये । हि च । छन्दस्यनेकमपि साकाङ्क्षम् । यावद्यथाभ्याम् । पूजायां नानन्तरम् । उपसर्गव्यपेतं च । तुपश्यपश्यताहैः पूजायाम् । अहो च ॥ २ ॥ शेषे विभाषा । पुरा च परीप्सायाम् । नन्वित्यनुज्ञैषणायाम् । किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् । लोपे विभाषा । एहिमन्ये प्रहासे लृट् । जात्वपूर्वम् । किंवृत्तं च चिदुत्तरम् । आहो उताहो चानन्तरम् । शेषे विभाषा । गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् । लोट् च । विभाषितं सोपसर्गमनुत्तमम् । हन्त च । आम एकान्तरमामन्त्रितमनन्तिके । यद्धितुपरं छन्दसि । चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः । चादिषु च । चवायोगे प्रथमा । हेति क्षियायाम् ॥ ३ ॥ अहेति विनियोगे च । चाहलोप एवेत्यवधारणम् । चादिलोपे विभाषा । वैवावेति चच्छन्दसि । एकान्याभ्यां समर्थाभ्याम् । यद्वृत्तान्नित्यम् । पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः । सगतिरपि तिङ् । कुत्सने च सुप्यगोत्रादौ । गतिर्गतौ । तिङि चोदात्तवति । आमन्त्रितं पूर्वमविद्यमानवत् । नामन्त्रिते समानाधिकरणे सामान्यवचनम् । विभाषितं विशेषवचने बहुवचनम् ॥ सर्वस्य बहुवचनस्य शेषेऽहेति चतुर्दश ॥

द्वितीयः पादः ।

पूर्वत्रासिद्धम् । नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति । न मु ने । उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य । एकादेश उदात्तेनोदात्तः । स्वरितो वानुदात्ते पदादौ । नलोपः प्रातिपदिकान्तस्य । न ङिसंबुद्ध्योः । मादुपधायाश्च मतोर्वोऽयवादिभ्यः । झयः । संज्ञायाम् । आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती । उदन्वानुदधौ च । राजन्वान्सौराज्ये । छन्दसीरः । अनो नुट् । नाद्धस्य । कृपो रो लः । उपसर्गस्यायतौ । ग्रो यङि ॥ १ ॥ अचि विभाषा । परेश्च घाङ्कयोः । संयोगान्तस्य लोपः । रात्सस्य । धि च । झलो झलि । ह्रस्वादङ्गात् । इट ईटि । स्कोः संयोगाद्योरन्ते च । चोः कुः । हो ढः । दादेर्धातोर्घः । वा द्रुहमुहष्णुहष्णिहाम् । नहो धः । आहस्थः । व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । एकाचो बशो भष्झषन्तस्य स्ध्वोः ।

SGDF

दधस्तथोश्च । झलां जशोऽन्ते । झषस्तथोर्धोऽधः ॥ २ ॥ षढोः कः सि । रदाभ्यां निष्ठातो नः पूर्वस्य च दः । संयोगादेरातो धातोर्यण्वतः । ल्वादिभ्यः । ओदितश्च । क्षियो दीर्घात् । श्योऽस्पर्शे । अञ्चोऽनपादाने । दिवोऽविजिगीषायाम् । निर्वाणोऽवाते । शुषः कः । पचो वः । क्षायो मः । प्रस्त्योऽन्यतरस्याम् । अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः । नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् । न ध्याख्यापॄमूर्छिमदाम् । वित्तो भोगप्रत्यययोः । भित्तं शकलम् । ऋणमाधमर्ण्ये ॥ ३ ॥ नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानिच्छन्दसि । क्विन्प्रत्ययस्य कुः । नशेर्वा । मो नो धातोः । म्वोश्च । ससजुषो रुः । अवयाः श्वेतवाः पुरोडाश्च । अहन् । रोऽसुपि । अम्नरूधरवरित्युभयथा छन्दसि । भुवश्च महाव्याहृतेः । वसुस्रंसुध्वंस्वनडुहां दः । तिप्यनस्तेः । सिपि धातो रुर्वा । दश्च । र्वोरुपधाया दीर्घ इकः । हलि च । उपधायां च । न भकुर्छुराम् । अदसोऽसेर्दादु दो मः ॥ ४ ॥ एत ईद्बहुवचने । वाक्यस्य टेः प्लुत उदात्तः । प्रत्यभिवादेऽशूद्रे । दूराद्धूते च । हैहेप्रयोगे हैहयोः । गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् । ओमभ्यादाने । ये यज्ञकर्मणि । प्रणवष्टेः । याज्यान्तः । ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः । अग्नीत्प्रेषणे परस्य च । विभाषा पृष्टप्रतिवचने हेः । निगृह्यानुयोगे च । आम्रेडितं भर्त्सने । अङ्गयुक्तं तिङाकाङ्क्षम् । विचार्यमाणानाम् । पूर्वं तु भाषायाम् । प्रतिश्रवणे च । अनुदात्तं प्रश्नान्ताभिपूजितयोः ॥ ५ ॥ चिदिति चोपमार्थे प्रयुज्यमाने । उपरिस्विदासीदिति च । स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु । क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् । अनन्त्यस्यापि प्रश्नाख्यानयोः । प्लुतावैच इदुतौ । एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ । तयोर्य्वावचि संहितायाम् ॥ पूर्वत्रासिद्धे चि षढोर्नसत्तैत ईच्चिादित्यष्टौ ॥

तृतीयः पादः ।

मतुवसो रु संबुद्धौ छन्दसि । अत्रानुनासिकः पूर्वस्य तु वा । आतोऽटि नित्यम् । अनुनासिकात्परोऽनुस्वारः । समः सुटि । पुमः खय्यम्परे । नश्छव्यप्रशान् । उभयथर्क्षु । दीर्घादटि समानपादे । नॄन्पे । स्वतवान्पायौ । कानाम्रेडिते । ढो ढे लोपः । रो रि । खरव-

SGDF

सानयोर्विसर्जनीयः । रोः सुपि । भोभगोअघोअपूर्वस्य योऽशि । व्योर्लघुप्रयत्नतरः शाकटायनस्य । लोपः शाकल्यस्य । ओतो गार्ग्यस्य ॥ १ ॥ उञि च पदे । हलि सर्वेषाम् । मोऽनुस्वारः । नश्चापदान्तस्य झलि । मो राजि समः क्वौ । हे मपरे वा । नपरे नः । ङ्णोः कुक्टुक्शरि । डः सि धुट् । नश्च । शि तुक् । ङमो ह्रस्वादचि ङमुण्नित्यम् । मय उञो वो वा । विसर्जनीयस्य सः । शर्परे विसर्जनीयः । वा शरि । कुप्वोः ᳲक ᳲपौ च । सोऽपदादौ । इणः षः । नमस्पुरसोर्गत्योः ॥ २ ॥ इदुदुपधस्य चाप्रत्ययस्य । तिरसोऽन्यतरस्याम् । द्विस्त्रिश्चतुरिति कृत्वोर्थे । इसुसोः सामर्थ्ये । नित्यं समासेऽनुत्तरपदस्थस्य । अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य । अधःशिरसी पदे । कस्कादिषु च । छन्दसि वाप्राम्रेडितयोः । कःकरत्करतिकृधिकृतेष्वनदितेः । पञ्चम्याः परावध्यर्थे । पातौ च बहुलम् । षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु । इडाया वा । अपदान्तस्य मूर्धन्यः । सहेः साडः सः । इण्कोः । नुम्विसर्जनीयशर्व्यवायेऽपि । आदेशप्रत्यययोः । शासिवसिघसीनां च ॥ ३ ॥ स्तौतिण्योरेव षण्यभ्यासात् । सः स्विदिस्वदिसहीनां च । प्राक्सितादड्व्यवायेऽपि । स्थादिष्वभ्यासेन चाभ्यासस्य । उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् । सदिरप्रतेः । स्तम्भेः । अवाच्चालम्बनाविदूर्ययोः । वेश्च स्वनो भोजने । परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् । सिवादीनां वाड्व्यवायेऽपि । अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु । वेः स्कन्देरनिष्ठायाम् । परेश्च । परिस्कन्दः प्राच्यभरतेषु । स्फुरतिस्फुलत्योर्निर्निविभ्यः । वेः स्कभ्नातेर्नित्यम् । इणः षीध्वंलुङ्लिटां धोऽङ्गात् । विभाषेटः । समासेऽङ्गुलेः सङ्गः ॥ ४ ॥ भीरोः स्थानम् । अग्नेः स्तुत्स्तोमसोमाः । ज्योतिरायुषः स्तोमः । मातृपितृभ्यां स्वसा । मातुःपितुर्भ्यामन्यतरस्याम् । अभिनिसः स्तनः शब्दसंज्ञायाम् । उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । सुविनिर्दुर्भ्यः सुपिसूतिसमाः । निनदीभ्यां स्नातेः कौशले । सूत्रं प्रतिष्णातम् । कपिष्ठलो गोत्रे । प्रष्ठोऽग्रगामिनि । वृक्षासनयोर्विष्टरः । छन्दोनाम्नि च । गवियुधिभ्यां स्थिरः । विकुशमिपरिभ्यः स्थलम् । अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः । सुषामादिषु च । एति संज्ञायामगात् । नक्षत्राद्वा ॥ ५ ॥

ह्रस्वात्तादौ तद्धिते । निसस्तपतावनासेवने । युष्मत्तत्ततक्षुःष्वन्तःपादम् । यजुष्येकेषाम् । स्तुतस्तोमयोश्छन्दसि । पूर्वपदात् । सुञः । सनोतेरनः । सहेः पृतनर्ताभ्यां च । न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् । सात्पदाद्योः । सिचो यङि । सेधतेर्गतौ । प्रतिस्तब्धनिस्तब्धौ च । सोढः । स्तम्भुसिवुसहां चङि । सुनोतेः स्यसनोः । सदेः परस्य लिटि । निव्यभिभ्योऽड्व्यवाये वा छन्दसि ॥ मतुवसो रूञि चेद्दुदुपधस्य स्तौतिण्योर्भीरोर्ह्रस्वात्तादावेकोनविंशतिः ॥

चतुर्थः पादः ।

रषाभ्यां नो णः समानपदे । अट्कुप्वाङ्नुम्व्यवायेऽपि । पूर्वपदात्संज्ञायामगः । वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः । प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि । विभाषौषधिवनस्पतिभ्यः । अह्नोऽदन्तात् । वाहनमाहितात् । पानं देशे । वा भावकरणयोः । प्रातिपदिकान्तनुम्विभक्तिषु च । एकाजुत्तरपदे णः । कुमति च । उपसर्गादसमासेऽपि णोपदेशस्य । हिनु मीना । आनि लोट् । नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च । शेषे विभाषाकखादावषान्त उपदेशे । अनितेः । अन्तः ॥ १ ॥ उभौ साभ्यासस्य । हन्तेरत्पूर्वस्य । वमोर्वा । अन्तरदेशे । अयनं च । छन्दस्यृदवग्रहात् । नश्च धातुस्थोरुषुभ्यः । उपसर्गाद्बहुलम् । कृत्यचः । णेर्विभाषा । हलश्चेजुपधात् । इजादेः सनुमः । वा निंसनिक्षनिन्दाम् । न भाभूपूकमिगमिप्यायीवेपाम् । षात्पदान्तात् । नशेः षान्तस्य । पदान्तस्य । पदव्यवायेऽपि । क्षुभ्नादिषु च । स्तोः श्चुना श्चुः ॥ २ ॥ ष्टुना ष्टुः । न पदान्ताट्टोरनाम् । तोः षि । शात् । यरोऽनुनासिकेऽनुनासिको वा । अचो रहाभ्यां द्वे । अनचि च । नादिन्याक्रोशे पुत्रस्य । शरोऽचि । त्रिप्रभृतिषु शाकटायनस्य । सर्वत्र शाकल्यस्य । दीर्घादाचार्याणाम् । झलां जश्झशि । अभ्यासे चर्च । खरि च । वावसाने । अणोऽप्रगृह्यस्यानुनासिकः । अनुस्वारस्य ययि परसवर्णः । वा पदान्तस्य । तोर्लि ॥ ३ ॥ उदः स्थास्तम्भोः पूर्वस्य । झयो होऽन्यतरस्याम् । शश्छोऽटि । हलो यमां यमि लोपः । झरो झरि सवर्णे । उदात्तादनुदात्तस्य स्वरितः । नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् । अ अ ॥ रषाभ्यामुभ्यां ष्टुना ष्टुरुदः स्थाष्टौ ॥ इत्यष्टमोऽध्यायः ।

SGDF
Sri Gargeshwari Digital Foundation